प्रोवाच वाक्यं देवेशं सती सप्रणयं तदा ॥१६
निवान्ति वाता हृदयावदारणा गर्जन्त्यमी तोयधरा महेश ।
स्फुरन्ति नीलाभ्रगणेषु विद्युतो वाशन्ति केकारवमेवबर्हिणः ॥१७
पतन्ति धारा गगनात्परिच्युता बकाबलाकाश्च भजन्ति तोयदान् ।
कदम्बसर्ज्जार्ज्जुनकेतकीनांपुष्पाणिमुञ्चन्ति च मारुतादिना ॥१८
क्षुत्वैव मेघस्य दृढं तु गर्जितं त्यजन्ति हंसाश्च सरांसि तत्क्षणात् ।
नीचोद्धतान्सत्पुरुषा यथाऽऽश्रयान्प्रवृद्धमूलानपि संत्यजन्ति ॥१९
इमानि यूथानि तथा मृगाणां त्वरन्ति धावन्ति रमन्ति शंभो ।
धावन्ति हृष्टानि वनस्थलीषु सर्वा भुवस्तोयद संप्रवृद्धया ॥२०
राजन्ति शष्पावृतसस्ययुक्तास्तथाऽचिराभाः सुतरां स्फुरन्ति ।
रम्येषु नीलेषु धनेषु देव नूनं समृद्धि मलि नस्य दृष्ट्वा ॥२१

इस प्रकार से वह ग्रीष्म ऋतु का समय तो निकल गया था । इसके अन्त में अब वर्षा ऋतु का समय उपस्थित हो गया था जिसमें मेघों के गर्जन की भीषण ध्वनि होती थी और सभी दिशाओं में महान् घोर अन्धकार छा गया था तथा सभी स्थल जनों से रहित और एक अद्भुत से हो गये थे ॥१५॥ ऐसे वर्षा के काल को उपस्थित देखकर दक्ष की पुत्री सती ने पुनः उस समय में परम पुण्य के साथ देवेश्वर से यह प्रार्थना की थी ॥१६॥ सती ने कहा—हे महेश्वर ! ये वायु हृदय को चीर देने वाली चल रही है और ये मेघ बहुत ही भीषणता के साथ गर्जन करते हैं । इन नीले वर्ण वाले घने मेघों के मध्य में विद्युत् की चमक होती है । बादलों की गर्जन सुनकर मयूरों की ध्वनियाँ चारों ओर हो रही हैं ॥१७॥ वर्षा की अविरल धाराऐं पड़ रही हैं । इस समय आकाश और भूमि सर्वत्र जलमय दिखलाई दे रहे हैं । बकों (बगुला)

की पंक्ति मेघों का सेवन करने का आनन्द प्राप्तकर रही हैं। वायु के तीव्र झोंकों से कदम्ब-सर्ज्ज-अर्जुन और केतकी के पुण्य झड़-झड़ कर वृक्षों से गिर रहे हैं ॥१८॥ मेघों की इस गर्जना को सुनते ही हंस गण तुरन्त ही सरोवरों का त्याग करके जा रहे हैं क्योंकि वर्षा के कारण अशोभन जल की अस्वच्छता उन्हें रुचिकर नहीं होती है। जिस प्रकार से प्रवृद्ध मूल वाले अपने आश्रयों को भी नीच तथा उद्धत पुरुषों से घिर जाने पर सत्पुरुष उनका त्याग करके अन्यत्र ही चले जाया करते हैं वैसे ही हंसों ने भी जलाशयों को त्याग दिया था ॥१६॥ हे शम्भो ! देखिये, ये मृगों के झुण्ड के झुण्ड भागे जा रहे हैं और किसी अन्य आश्रय में रमण करने के इच्छुक हैं। सभी जीव इस वन की स्थली में जहाँ-तहाँ प्रसन्न होकर भाग दौड़ कर रहे हैं और यह सम्पूर्ण भूमि मेघों की वृद्धि से परिपूर्ण हो गई है ॥२०॥ इस भूमि पर चारों ओर घास निकल आई है, फसलें उग रही हैं और तुरन्त ही ये सब अपने ही आप स्फुरित होकर प्रकट हो गईं हैं ॥२१॥

चरन्ति शूरास्तरणोद्गमेषु उद्वृत्तवेगाः सहसैव निम्नगाः ।
जाताः शशाङ्काङ्कितचारुमौलेकिमत्रचित्रं यदनुज्ज्वलं जनम् ॥२२
श्रयन्ति नीचानुगता हि योषितो नीलेषु मेघेषु समाश्रितं नभः ।
पुष्पेषु सर्ज्जा मुकुलेषु नीपाः फलेषु च श्रीश्च पयस्स्वथापगाः ॥२३
पत्रेषु पद्मेषु महासरांसि सुदुस्तरः संप्रति वर्षकालः ।
इतीदृशे शकर दुःसहेऽद्भुते काले सुरौद्रे ननु ते ब्रवीमि ॥२४
गृहं कुरुष्वात्र महाचलोत्तमे सुनिर्वृता येन भवामि शभो ।
इत्थं त्रिनेत्रः श्रुतिरामणीयकं श्रुत्वा वचो वाक्यमिदं बभाषे ॥२५
न मेऽस्ति वित्तं गृहसंचयार्थे मृगारिचर्मावृतदेहिनः प्रिये ।
ममोपवीतं भुजगेश्वरः फणी कर्णेऽपि पद्मश्च तथैव पिङ्गलः ॥२६
केयूरमेकं मम कम्बलस्त्वहिर्द्वितीयमन्यो भुजगो धनंजयः ।
नागस्तथैवाश्वतरोऽहिकङ्कणं सव्ये तरे तक्षक उत्तरं तथा ।
नीलोऽपि नीलाञ्जनतुल्यवर्णः श्रोणीतटे राजति सुप्रतिष्ठः ॥२७

इस वर्षा के काल में शूर लोग तरणोद्गमों में विचरण कर रहे हैं। समस्त नदियाँ सहसा ही उद्वृत्त वेग वाली हो गई हैं अर्थात् अत्यन्त वेग के साथ बह रहीं हैं। हे प्रभो ! आपके मस्तक पर तो चन्द्र विराजमान है किन्तु जो साधारण जन तो उज्ज्वल इस समय में नहीं है—इसमें क्या विचित्रता है ? ॥२२॥ आकाश में एकदम नील वर्ण वाले मेघ छाये हुए हैं इस समय में नदियाँ नीचों के भी अनुगत होकर उनका समाश्रण कर लिया करती हैं क्योंकि उनका स्वभाव भीरु होता है। पुष्पों में सर्ज्ज (सहजना), मुकुलों में कदम्ब और फलों में श्री है। नदियों में अथाह जल भरा हुआ है ॥२३॥ यह वर्षा का काल पत्रों में, पद्मों में तथा महान् सरोवरों में सर्वत्र इस समय सुदुस्तर हो गया है। हे शकर ! इस तरह के ऐसे दुस्सह और अद्भुत एवं महान् भीषण काल के उपस्थित हो जाने पर मैं पुन: आपकी सेवा में विनम्र निवेदन करती हूँ ॥२४॥ हे शम्भो ! यहाँ पर इस महान् एवं उत्तम पर्वत पर कहीं एक निवास के लिये घर बनाइये जिससे मैं सुनिर्वृत हो सकूँ। ऐसे कानों को सुनने में प्रिय लगने वाले वचन को श्रवण करके सती से यह वचन बोले ॥२५॥ हे प्रिये ! घर को निर्माण कर उसके सञ्चय के करने के लिये मेरे पास तो कुछ भी धन नहीं है क्योंकि यह तो तुम देखती ही हो कि मैं तो व्याघ्र चर्म से ही अपना सम्पूर्ण शरीर ढककर रहा करता हूँ। मेरा उपवीत भी सर्पों का राजा भुजंग ही है। मेरे कान में भी उसी भाँति एक पद्म रहता है, पिंगल ही मेरा केयूर है। मेरे पास कम्बल भी दूसरा ही सर्प हैं। अन्य धनञ्जय नाग सव्य हाथ का कंकण है तो दूसरे हाथ का तक्षक है और नीले अञ्जन के समान नील वर्ण वाला नील भी मेरे श्रोणी तर में प्रतिष्ठित है ॥२६-२७॥

इति वचनमथोग्रं शंकरात्सा मृडानी
श्रुतमपि तदसत्यं श्रीमदाकर्ण्य भीता।
अवनितलमवेक्ष्य स्वामिनो वासकृच्छ्रा
त्परिवदति सरोषं लज्जयो च्छस्य चोष्णम् ॥२८

किमेवं संश्रितायास्तु प्रावृट्काल: प्रयास्यति ।
वृक्षमूले स्थितायास्तु सुनयेन वदाव्यय ।।२९
घनावस्थितदेहाया: प्रावृट्काल: प्रयास्यति ।
यथाऽम्बुधारा न तव निपतिष्यन्ति विग्रहे ।।३०
ततो हरस्तद्घनखण्डमुन्नतमारुह्य तस्थौ सह दक्षकन्यया ।
ततोऽभवन्नाम महेश्वरस्य जीमूतकेतुस्त्विति विश्रुतं दिवि ।।३१

पुलस्त्य मुनि ने कहा—उस देवी मृडानी ने इस भाँति के अतीव उग्र वचन भगवान् शंकर से सुने थे किन्तु वे सब श्री युक्त होते हुए भी असत्य हैं ऐसा श्रवण करके सती भयभीत हो गई थी फिर अपने स्वामी के इस कष्ट पूर्ण निवास से दु:खित होकर सती ने भूमि तल की ओर देखा था और क्रोध के साथ लज्जा से एक उष्ण श्वास लेकर कहने लगीं ।।२८।। देवी ने कहा—इस प्रकार से संश्रित रहने वाली मेरा यह वर्षा ऋतु का काल कैसे व्यतीत होगा ? हे अविनाशी प्रभो ! आप ही एक न्यायोचित उत्तर प्रदान कीजिए कि मैं इस घोर वर्षा के दारुण काल में वृक्ष के मूल में किस तरह स्थित रह सकूंगी ? ।।२९।। भगवान् शंकर ने कहा—घनों में अवस्थित देह वाली आपका यह वर्षा ऋतु का समय निकल जायेगा । इससे जल की धारा आपके शरीर पर नहीं गिरेंगी ।।३०।। पुलस्त्य मुनि ने कहा—इसके अनन्तर एक उन्नत घन के खण्ड पर शंकर समारूढ़ हो गये थे और वहीं पर दक्ष की कन्या सती के साथ स्थित हो गये थे । तभी से भगवान् महेश्वर का 'जीमूत केतु'—यह नाम पड़ गया था । इसका अर्थ है मेघों की ध्वजा । यह नाम सर्वत्र देवलोक में प्रसिद्ध है ।।३१।।

२–नरोत्पत्ति–प्रलय कथन

ततस्त्रिनेत्रस्य गत: प्रावृट्कालो घनोपरि ।
लोकानन्दकरी रम्या शरत्समभवन्मुने ।।१
त्यजन्ति नीलाम्बुधरा नभस्तलं वृक्षांश्च कंका: सरितस्तटानि ।
पद्मानि गन्धं निलयानि वायसा रुरुर्विषाणं कलुषं जलाशया: ।।२

विकासमायान्ति च पङ्कजानि चन्द्रांशवो भान्ति लता:सुपुष्पा: ।
नन्दन्ति कृष्टान्यपि गोकुलानि सन्तश्च संतोषमनुव्रजन्ति ।।३
सरस्सु पद्मं गगने च तारका जलाशयेष्वेव तथा पयांसि ।
सतां च चित्तं हि दिशांमुखै:समवैमल्यमायान्तिशशाङ्ककान्तय: ।४
एतादृशे हर: काले मेघपृष्ठाधिवासिनीम् ।
सतीमादाय शैलेन्द्रं मन्दरं समुपाययौ ।।५
ततो मन्दरपृष्ठेऽसौ स्थित: समशिलातले ।
रेमे स शंभुर्भगवान्सत्या सह महाद्युति: ।।६
ततो गतायां शरदि प्रबुद्धे चैव केशवे ।
दक्ष: प्रजापतिश्रेष्ठो यष्टुमारभत क्रतुम् ।।७

पुलस्त्य मुनि ने कहा—इसके अनन्तर वह वर्षा ऋतु का समय भगवान् शंकर का उस घन के ऊपर ही व्यतीत हो गया था । हे मुने ! फिर सभी लोगों का आनन्द प्रदान करते वाली तथा परम रमा शरत् ऋतु आ गई थी ।।१।। शरत्काल के आते ही नील वर्ण वाले मेघों ने आकाश का त्याग कर दिया था अर्थात् मेघों के न रहने से आकाश एकदम निर्मल एवं स्वच्छ हो गया था । कंकों ने वृक्षों का त्याग कर दिया था और नदियों में जो वर्षा में एकदम उभार आकर तटों को घेर लिया था वह भी शान्त हो गया था और तटों को नदियों ने त्याग दिया था । पद्मों ने गन्ध को, वायसों ने अपने निलयों अर्थात् निवासों को, रुरु ने निषाण को तथा जलाशयों ने कलुषता (मैलापन) का त्याग कर दिया था ।।२।। शरत्काल के आते ही कमलों में खिलावट आ गई थी । चन्द्रमा की स्वच्छ किरणें शोभायुक्त दिखाई देने लगीं थीं । सभी लताऐं सुन्दर पुष्पों से शोभित हो गईं थीं । जो कृष्ट गोकुल अर्थात् गौओं का समुदाय था और सन्त पुरुषों को भी अतीव सन्तोष हो गया था । वर्षारम्भ में ही सन्त लोग यात्रा स्थागित कर एक ही स्थान पर स्थिर हो जाते हैं क्योंकि तीर्थाटनों में सर्वत्र मार्गावरोध हो जाता था ।।३।। सरोवरों में कमल, आकाश में तारे, जलाशयों में जल, सत्पुरुषों का चित्त, दिशाओं के मुखों के साथ चन्द्रमा की किरणें सभी

विमलता को प्राप्त हो गये थे ।।४।। ऐसे समय में भगवान् हर मेघ की पीठ पर अधिवास करने वाली सती को लेकर शैलों के शिरोमणि मन्दराचल पर चले गये थे ।।५।। इसके अनन्तर मन्दराचल की पीठ पर स्थित होकर समशिला के तल पर शम्भु भगवान् जिनकी महान् द्युति थी, सती के साथ रमण करते थे ।।६।। फिर शरत्काल भी व्यतीत हो गया था और देवोत्थापनी एकादशी तिथि आ गयी थी। केशव प्रभु के प्रबुद्ध होने पर प्रजापतियों में श्रेष्ठ दक्ष ने यज्ञ करने का समारम्भ किया था ।।७।।

द्वादशैव स चादित्याञ्छक्रादींश्च सुरोत्तमान् ।
सकश्यपान्समामन्त्र्य सदस्यान्समचीकरत् ।।८
अरुन्धत्याऽनुसहितं वसिष्ठं शंसितव्रतम् ।
सहाऽनुसूययाऽत्रिं च सह धृत्या च कौशिकम् ।।९
अहल्यया गौतमं च भरद्वाज ममायया ।
चन्द्रया सहितं ब्रह्मन्नृषिमङ्गिरस तथा ।।१०
आमन्त्र्य कृतवान्दक्षः सदस्यान्यज्ञकर्मणि ।
सदस्यान्गुणसंपन्नान्वेदवेदाङ्गपारगान् ।।११
धर्मं च स समाहूय भार्ययाऽहिंसया सह ।
निमन्त्र्य यज्ञवाटस्य द्वारपालार्थमादिशत् ।।१२
अरिष्टनेमिनं चक्रे इध्माहरणकारिणम् ।
चन्द्रया सहितं ब्रह्मन्नृषिमङ्गिरसं तथा ।।१३
मृष्टान्नपानसंस्कारे सम्यग्दक्षः प्रयुक्तवान् ।
भृगुं च सत्रसंस्कारे सम्यग्दक्षः प्रयुक्तवान् ।।१४

उस समय में प्रजापति ने शक्र (इन्द्र) आदि सभी श्रेष्ठ देवगण को—बारह आदित्यों को और कश्यप के सहित सभी सदस्यों का समामन्त्रित करके यज्ञ का कर्म किया था ।।८।। शंसित व्रत वाले अरुन्धती के सहित वसिष्ठ मुनि को और अनुसूया के सहित अत्रि मुनि को तथा धृति के सहित कौशिक मुनि को आमन्त्रित किया था ।।९।। अहल्या पत्नी के समेत गौतम को, अमाया के साथ भरद्वाज को और चन्द्रा के सहित

आङ्गिरा ऋषि को भी हे ब्रह्मन ! दक्ष प्रजापति ने निमन्त्रित किया था ।।१०।। दक्ष ने सकल गुण गणों से सुसम्पन्न तथा वेदों एवं वेदों के अंग में शास्त्रों पारगामी विद्वान समस्त सदस्यों को उस यज्ञ कर्म्म में आमन्त्रित करके यज्ञ का आरम्भ किया था ।।११।। दक्ष ने अहिंसा धर्म पत्नी के सहित धर्म का आव्हान किया था और धर्म को आमन्त्रित करके उनको यज्ञ द्वार के द्वारपाल के कर्म में नियुक्त करने की आज्ञा दे दी थी ।।१२।। अरिष्ट ने मिको इध्म के आहरण करने वाले कर्म में नियोजित किया था । दक्षने मिष्ठान्न पात्र के संस्कार करने के कर्म में भली भाँति से प्रयुक्त किया था । भृगुमुनि को सत्र के संस्कार करने के कार्य में नियुक्त किया था ।।१४।।

तथा चन्द्रमसं देवं रोहिण्या सहितं शुचिम् ।
धनानामाधिपत्ये स युक्त वाह्लि प्रजापतिः ।।१५
जामातृन्दुहितृश्चैव दौहित्रांश्च प्रजापतिः ।
सशंकरां सतीं मुक्त्वा मखे सर्वान्न्यमन्त्रयत् ।।१६
किमर्थं लोकपतिना धनाध्यक्षो महेश्वरः ।
ज्येष्ठः श्रेष्ठो वरिष्ठोऽपि आद्योऽपि न निमन्त्रितः ।।१७
ज्येष्ठः श्रेष्ठो वरिष्ठोऽपि आद्योऽपि भगवाञ्छिवः ।
कपालीति विदित्वेशो दक्षेण न निमन्त्रितः ।।१८
किमर्थं देवताश्रेष्ठः शूलपाणिस्त्रिलोचनः ।
कपाली भगवाञ्जातः कर्मणा केन शंकरः ।।१९
शृणुष्वावहितो भूत्वा कथामेतां पुरातनीम् ।
प्रोक्तां ह्यादिपुराणेषु ब्रह्मणाऽव्यक्तमूर्तिना ।।२१
पुरा त्वेकार्णवे लोके नष्टे स्थावरजङ्गमे ।
नष्टचन्द्रार्कनक्षत्रे प्रनष्टपवनानले ।।२१

रोहिणी के सहित परम पवित्र चन्द्रदेव को धर्म के आधिपत्य के कार्य में नियुक्त किया था । प्रजापति ने अपनी सभी पुत्रियों को तथा जमाइयों को भी आमन्त्रण किया था और धेवतों को भी बुलाया था । उस मख में सभी का आमन्त्रण किया था केवल एक पुत्री सती और

उसके पति शंकर जामाता का आमन्त्रण नहीं किया था ।।१५-५६।। देवर्षि नारदजी ने कहा—हे भगवन् ! क्या कारण था कि लोकपति दक्ष ने धन के स्वामी महेश्वर को निमन्त्रित नहीं किया था जो कि सब में ज्येष्ठ, परम श्रेष्ठ, अतीव वरिष्ठ और आद्यपी थे ।।१७।। पुलस्त्य मुनि ने कहा—भगवान् शिव निश्चय ही ज्येष्ठ-श्रेष्ठ वारद्यि और अष्ठ भी थे किन्तुवे कपाल धारण करने वाले हैं–यही समझकर प्रजापति दक्ष ने उनको आमन्त्रित नहीं किया था ।।१८।। देवर्षि नारदजी ने कहा—किस कारण से देवगण में परम श्रेष्ठ त्रिलोचन शूलपाणि कपालों के धारण करने वाले हो गये थे । भगवान् शंकर का ऐसा क्या कर्म था जिससे उनको ऐसा करने को विवश होना पड़ा था ।।१९।। पुलस्त्य मुनि ने कहा था—हे नारद ! आप इस विषय की एक परम पुरानी कथा का श्रवण करो और सावधान हो जाओ । इस कथा को आदि पुराणों में अव्यक्त मूर्ति वाले ब्रह्माजी ने कहा था जिसे मैं इस समय में आपको श्रवण करा रहा हूँ ।।२०।। पहिले समय में जब कि ये समस्त लोक नष्ट हो गये थे और स्थावर जंगम कुछ भी शेष नहीं था । केवल एक मात्र सागर ही दिखलाई देता था । चन्द्र-सूर्य-नक्षत्र-वायु और अनल सभी कुछ नष्ट हो जाते हैं ।।२१।।

अप्रतर्क्यमविज्ञेयं भावाभावविवर्जितम् ।
निमग्नवीरुत्सतृणं तमोभूतं सुदुर्दिनम् ।।२२
तस्मिन्स शेते भगवान्निशां वर्षसहस्रकीम् ।
रात्र्यन्ते सृजते लोकान्राजसं रूपमास्थितः ।।२३
रेजे स पञ्चवदनो वेदवेदाङ्गपारगः ।
स्रष्टा चराचरस्यास्य जगतोऽद्भुतदर्शनः ।।२४
तमोमयस्तथैवान्यः समुद्भूतस्त्रिलोचनः ।
शूलपाणिः कपर्दी च अक्षमालां च दर्शयन् ।।२५
ततो महात्मा ह्यसृजदकहंकारं सुदारुणम् ।
येनाक्रान्तावुभौ देवौ तावेव ब्रह्मशंकरौ ।।२६
अहंकारावृतो रुद्रः प्रत्युवाच पितामहम् ।

को भवानिह संप्राप्तः केनसृष्टोऽसि मां वद ।।२७
पितामहोऽप्यहंकारी प्रत्युवाचाथ को भवान् ।
भवतो जनकः कोऽत्र जननी वा तदुच्यताम् ।।२८

वह समय कुछ ऐसा अद्‌भुत होता है कि कोई भी उसकी तर्कना नहीं कर सकता है और किसी के भी ज्ञान का विषय नहीं होता है। भाव और अभाव दोनों ही से रहित वह समय होता है। सभी वीरुत्–तृण आदि सागर के जल में निमग्न हो जाते हैं। एक दम सर्वत्र घना अन्धकार और दुर्दिन छाया रहता है ।।२२।। उस स्थिति में वह परात्पर भगवान् एक सहस्र वर्ष की निशा में योग निद्रा का आनन्द लेते हुए शयन किया करते हैं। जब उनकी उस निद्रा की समाप्ति होती है तो पुनः रूप में समास्थिति होकर निरन्तर लोकों का सृजन किया करते हैं ।।२३।। वह पाँच मुख वाला प्रभु, समस्त वेदों तथा वेदांगों में पारंगत, अद्‌भुत दर्शन वाले इस सम्पूर्ण चराचर जगत के सृजन करने वाले हैं ।।२४।। उसी भाँति तमोमय अन्य त्रिलोचन समुद्‌भूत होते हैं। हाथ में शूल ग्रहण किये हुए, कपर्दी और अक्षों की माला को दिखाते हुए प्रकट होते हैं। यह भी उसी प्रभु का एक दूसरा स्वरूप है ।।२५।। इसके अनन्तर महान् आत्मा वाले प्रभु ने अतिशय दारुण अहकार का सृजन किया था जिसने उन दोनों देवों को जो ब्रह्मा और शंकर नाम वाले थे, आक्रान्त कर लिया था ।।२६।। अहंकार से समावृत होकर रुद्र देव ने अपने पितामह से कह दिया था। आप यहाँ पर कौन हैं ? मेरी रचना किसने की थी ? मुझे यह बतलाओ ।।२७।। उधर पितामह ब्रह्माजी अहंकार से आक्रान्त थे ही। उनने भी रुद्रदेव से कहा—आप कौन हैं ? यहाँ पर आपका पिता तथा माता कौन हैं ? हमको यह सब बतलाइये ।।२८।।

इत्यन्योन्यं पुरा ताभ्यां ब्रह्मेशाभ्यां किल प्रियः ।
परिवादोऽभवत्तत्र उत्पत्तिर्भवतोऽभवत् ।।२९
भवानप्यन्तरिक्षं हि जातमात्रस्तदोत्पतत् ।
धारयन्नतुलां वीणां कुर्वन्किलकिला ध्वनिम् ।।३०

ततो विनिर्जितः शंभुर्मानिना ब्रह्मयोनिना ।
तस्थावधोमुखो दीनो ग्रहाक्रान्तो यथा शशी ॥३१
पराजिते लोकपतौ देवेन परमेष्ठिना ।
क्रोधान्धकारितं रुद्रं पञ्चमं मुखमब्रवीत् ॥३२
अहं ते प्रतिजानामि तमोमूर्त्ते त्रिलोचन ।
दिग्वासा वृषभारूढो लोकक्षयकरो भवान् ॥३३
इत्युक्तः शंकरः क्रुद्धो ब्रह्माणं घोरचक्षुषा ।
निर्दग्धुकामस्त्वनिशं ददर्श भगवानजः ॥३४
तयस्त्रिनेत्रस्य समुद्भवन्ति वक्राणि पञ्चाथ सुदुर्दृशानि ।
सितं च रक्तं कनकावदातं नीलं तथा पिञ्जरकं च रौद्रम् ॥३५

इस प्रकार से परस्पर में उन दोनों ब्रह्मा और शिव का एक बड़ा ही प्रिय परिवाद हो गया था । वहाँ पर फिर आपकी उत्पत्ति हुई थी ॥२९॥ आप भी समुत्पन्न होते ही उस समय में एक अनुपम वीणा हाथ में धारण करते हुए किला-किला ध्वनि करते हुए ऊपर चले गये थे ॥३०॥ इसके अनन्तर यह हुआ कि यह महामानी ब्रह्माजी ने शम्भु को जीत लिया था और वह शम्भु नीचे की ओर मुख करके अत्यन्त दीन दशा में ग्रहों से आक्रान्त शशि की भाँति ही संस्थित हो गये थे ॥३१॥ परमेष्ठी देव के द्वारा लोकों के स्वामी शिव के पराजित हो जाने पर क्रोध से अन्धकार युक्त पांचवाँ रुद्र मुख से बोला ॥३२॥ हे तम की मूर्तिवाले त्रिलोचन! मैं आपको जानता हूँ । आप सर्वदा नग्न रहने वाले वृषभ पर समारूढ़ होकर रहा करते हैं । आप तो इस लोक के संहार करने वाले हैं ॥३३॥ इस तरह से जिस समय में भगवान् शंकर से कहा गया था तो वह अत्यन्त क्रुद्ध हो गये और और अपने परम घोर नेत्र से ब्रह्माजी को निर्दग्ध कर देने की कामना की थी । भगवान् अज ने निरन्तर यह देखा था ॥३४॥ इसके पीछे भगवान् त्रिनेत्र अर्थात् शिव के सुदुर्दर्श पाँच मुख समुत्पन्न हो गये थे । उन पांचों मुखों के पाँच तरह के वर्ण थे–एक श्वेत था–दूसरा रक्त–सुवर्ण के समान आसुर–नील और पिञ्जरक रौद्र था ॥३५॥

वक्त्राणि दृष्ट्वाऽर्कसमानि सद्यः पितामहो वाक्यमुवाच रुद्रम् ।
समाहतस्याथजलस्यबुद्बुदाभवन्तिकिंतेषुपराक्रमोऽस्ति ॥३६
तच्छ्रुत्वा क्रोधयुक्तेन शंकरेण महात्मना ।
नखाग्रेण शिरश्छिन्नं ब्राह्मं परुषवादकम् ॥३७
तच्छिन्नं शंकरस्यैव सव्ये करतलेऽपतत् ।
पतते न कदाचिच्च तदा करतलाच्छिरः ॥३८
अथ क्रोधावृतेनाथ ब्रह्मणाऽद्भुतकर्मणा ।
सृष्टस्तु पुरुषो धीमान्कवची कुण्डली शरी ॥३९
धनुष्पाणिमहाबाहुर्बाणशक्तिधरोऽव्ययः ।
चतुर्भुजो महातूणी आदित्य समदर्शनः ॥४०
स त्वाह गच्छ दुर्बुद्धे मा त्वां शूलिन्निपातये ।
भवान्पापसमायुक्तः पापिष्ठं को जिघांसति ॥४१
इत्युक्तः शंकरस्तेन पुरुषेण महात्मना ।
प्रियायुक्तो जगामाथ रुद्रो बदरिकाश्रमम् ॥४२

भगवान पितामह सूर्य के समान पाँचों मुखों को देखकर तुरन्त ही रुद्र से यह वचन बोले—ब्रह्माजी ने कहा—समाहत जो जल होता है उसमें भी बुलबुले हो जाया करते हैं उनमें आपका क्या पराक्रम है ? ॥३६॥ यह ब्रह्मा की वाणी सुन कर महात्मा शंकर को महान क्रोध आ गया था और फिर उन्होंने अपने नख के अग्र भाग से ब्रह्माजी का जो यह कठोर वचन बोलने वाला शिर छिन्न कर दिया था ॥३७॥ वह छिन्न हुआ शिर शंकर के ही सव्य करतल में गिर गया था और वह हाथ में पड़ा हुआ शिर किसी भी प्रकार से हाथ से नीचे नहीं गिरा था ॥३८॥ इसके अनन्तर क्रोध से समावृत ब्रह्मा ने, जिनके अद्भुत कर्म्म थे, एक पुरुष का सृजन किया था जो बहुत धीमान्—कवचधारी, कुण्डलों को पहिने हुए, हाथ में धनुष धारण करने वाले,महान् बाहुओं से युक्त बाण की शक्ति धारण करने वाला तथा अन्याय था। महान् तूण वाले—चार भुजाओं से युक्त और सूर्य के तुल्य तेजयुक्त दिखलाई देते थे ॥३९-४०॥ उसने शंकर से कहा—हे दुष्ट बुद्धि वाले ! तुम यहांसे चले जाओ।

हे शूलिन्! मैं तुम्हारा वध नहीं करता हूँ। क्योंकि आप तो महान् पापों से समायुक्त हैं। ऐसे घोर पापी को कौन मारता है ।।४१।। उस महान् आत्मा वाले पुरुष के द्वारा इस तरह से जब शंकर से कहा गया था तो वह रुद्र प्रिया के साथ ही बद्रिकाश्रम को चला गया था ।।४२।।

नरनारायणस्थानं पर्वते हि हिमालये।
सरस्वती यत्र पुण्या स्यन्दते सरितां वरा ।।४३
तत्र गत्वा च तं दृष्ट्वा नारायणमुवाच ह।
भिक्षां प्रयच्छ भगवन्महाकारुणिकोऽसि भोः ।।४४
इत्युक्तो धर्मपुत्रस्तु रुद्रं वचनमब्रवीत्।
सव्य भुज ताडयस्व त्रिशूलेन महेश्वर ।।४५
नारायणवचः श्रुत्वा त्रिशूलेन महेश्वरः।
सव्यं नारायणभुजं ताडयामास वेगवान् ।।४६
त्रिशूलाभिहतान्मार्गात्तिस्रो धारा विनिर्ययुः।
एका गगनमाश्रित्य स्थिता ताराभिमण्डितम् ।।४७
द्वितीया न्यपतद्भूमौ तां जग्राह तपोधनः।
अत्रिस्तस्मात्समुद्भूतो दुर्वासाः शंकरांशतः ।।४८
तृतीया न्यपतद्धारा कपाले रौद्रदर्शने।
तस्माच्छिशुः समभवत्संनद्धः कवची युवा ।।४९

हिमवान् पर्वत में नर नारायण भगवान् का स्थान है। जहां पर सरिताओं में परम श्रेष्ठ एव पुण्यमयी सरस्वती नदी बहती है ।।४३।। वहाँ पहुँचकर रुद्रदेव में भगवान् नारायण का दर्शन किया था और उनसे प्रार्थना की कि हे भगवन्! आप मुझे शिक्षा प्रदान कीजिए मैं अत्यन्त ही करुणा से पूर्ण दशा में स्थित हूँ ।।४४।। जब इस रीति से प्रार्थना पूर्वक भिक्षा की याचना की गई तो धर्म पुत्र ने रुद्रदेव से यह वचन कहा था—हे महेश्वर! अपने त्रिशूल से सव्य भुजा को ताड़ित करो ।।४५।। भगवान् नारायण के वचन का श्रवण करो। महेश्वर ने उसी समय में वेग से युक्त होकर भगवान् नारायण के सव्य भुजा को त्रिशूल के द्वारा प्रताड़ित किया था ।।४६।। जिस स्थान पर त्रिशूल

से अवभि हनन किया था उस मार्ग से तीन धाराऐं विनिर्गत हुई थीं उन तीन धाराओं में से एक धारा ने तो आकाश का आश्रय ग्रहण कर लिया था और उम ताराओं से अभि मण्डित गगन में जाकर स्थित हो गई थी। दूसरी धारा भू मण्डल में गिर गयी थी उसको तपोधन ने ग्रहण कर लिया था। वह तप को ही धन मानने वाले अत्रि मुनि थे। उनसे ही शकर के अंश से दुर्वासा मुनि प्रकट हुए थे ॥४६-४७॥ तीसरी धारा महान् रौद्र दर्शन वाले कपाल में गिरी थी। उससे एक शिशु समुत्पन्न हुआ था जो भली भांति संनद्ध–युवा और कवचधारी था ॥४८॥४६॥

श्यामावदात: शरचापपाणिर्गर्जन्यथा प्रावृषि तोयदोऽसौ।
इत्थंब्रु वन्कस्यविनाशयामिस्कन्धाच्छिरस्तालफलंयथैव ॥५०
तं शङ्करोऽवेत्य वचो बभाषे नरं हि नारायण बाहुजातम्।
निपातयैनं नर दुष्टवाक्यं ब्रह्मात्मजं सूर्यशतप्रकाशम् ॥५१
इत्येवमुक्त: स तु शङ्करेण आद्यं धनुस्त्वाजगवं प्रसिद्धम्।
जग्राहतूणानि तथाऽक्षयाणि युद्धाय: वीर: स मतिंचकार ॥५२
तत: प्रबुद्धौ सुभृशं महाबलौ ब्रह्मात्मजो बाहुभवश्चशार्व:।
दिव्यं सहस्रं परिवत्सराणां ततो हरेणापि विरञ्चिरूचे ॥५३
जितस्त्वदीय: पुरुष: पितामहनरेण दिव्याद्भुतकर्मणाबली।
महापृषत्कैरभिपत्य ताडितस्तदद्भुतं चेह दिशो दशैव ॥५४
ब्रह्मा तमीशं वचनं बभाषे नेहास्य जन्मन्यजितस्य शंभो।
पराजितं चैष्यतेऽसौ त्वदीयो नरो मदीय: पुरुषोमहात्मा ॥५५
इत्येवमुक्त्वा वचनं त्रिनेत्रं चिक्षेप सूर्ये पुरुषं विरञ्चि।
नरं नरस्यैव तदा स विग्रहे चिक्षेप धर्मप्रभवस्य देव: ॥५६

इस उत्पन्न होने वाले युवा के हाथ में शंख और चाप थे–श्याम तथा अवदान (श्वेस) वर्ण से युक्त था। यह उसी समय में इस तरह गर्जना कर रहा था जैसे वर्षा की ऋतु में मेघ गर्ज रहा हो। यह समुत्पन्न युवा यह मुख से बोल रहा था कि जैसे ताल का फल गिरे उसी भांति धड़ से शिर को काट कर मैं इस समय में किस का विनाश कर

डालूं ॥५०॥ उसी समय में उसके पास भगवान् शंकर उपस्थित होकर उससे यह वचन बोले—हे नर ! नर और नारायण की बाहुओं को निथतित कर दो । यह सैकड़ों सूर्यों के समान प्रकाश वाले—ब्रह्मा के पुत्र और दुष्ट वचन बोलने वाले हैं ॥५१॥ इस तरह से भगवान् शंकर के द्वारा कहे जाने पर उसने आदि में होने वाला परम प्रसिद्ध आजगव धनुष ग्रहण किया था और साथ ही अक्षय तूण भी ग्रहण किये थे । उस वीर को तुरन्त ही युद्ध करने के लिए अपनी बुद्धि स्थिर करली थी ॥५२॥ इसके अनन्तर अत्यन्त महान् बल वाले वे दोनों भी प्रबुद्ध हो गये थे उनमें एक तो ब्रह्मा का पुत्र था और दूसरा बाहु से समुत्पन्न शिव का पुत्र था । यह युद्ध दिव्य एक सहस्र वर्षों तक हुआ था । इसके अनन्तर भगवान् हर के द्वारा ब्रह्माजी से कहा गया था ॥५३॥ हे पिता-मह ! परम दिव्य एवं अद्भुत कर्म्म वाले नर के द्वारा यह महान् बल-शाली आपका पुरुष जीत लिया गया है । महान् पृषत्कों के द्वारा अभि पतन करके यहाँ पर दशों दिशाओं में अद्भुत्तर युद्ध हुआ है ॥५४॥ ब्रह्माजी ने उस समय शिव से यह वचन कहे थे—हे शम्भो ! इसके इस जन्म में यह यहाँ पर अजित है । यदि इसको पराजित करने की ही इच्छा है तो आपका यह नर और मेरा पुरुष महात्मा है ॥५५॥ इन नर त्रिनेत्र से कह कर ही विरक्ति ने पुरुष को सूर्य पर प्रक्षिप्त कर दिया था । उस समय में देव ने धर्म्म से प्रभव होने वाले नर के विग्रह में नर को प्रक्षिप्त कर दिया था ॥५६॥

३—हरि-हर-संवाद वर्णन

ततः करतले रुद्रः कपाले दारुणे स्थिते ।
संताप मगमद्ब्रह्म श्चितयाऽऽकुलितेन्द्रियः ॥१

ततः समागता रौद्रा नीलाञ्जनचयप्रभा ।
संरक्तमूर्धजा भीमा ब्रह्महत्या हरान्तिकम् ॥२
तामागतां हरो दृष्ट्वा पप्रच्छ विकरालिनीम् ।

कासित्वमागता रौद्रे केनाप्यर्थेन तद्वद ।।३
कपालिनमथोवाच ब्रह्महत्या सुदारुणा ।
ब्रह्महत्याऽस्मि संप्राप्ता मां प्रतीच्छ त्रिलोन ।।४
इत्येवमुक्त्वा वचन ब्रह्महत्या विवेश तम् ।
त्रिशूलपाणिनं रुद्रं संप्रतापितविग्रहम् ।।५
ब्रह्महत्याभिभूतश्च शर्वो बदरिकाश्रमम् ।
आगच्छन्नो ददर्शाथ नरनारायणावृषी ।।६
अदृष्ट्वा धर्मतनयौ चिन्ताशोकसमविन्त: ।
जगाम यमुनां स्नातुं साऽपि शुष्कजलाऽभवत् ।।७

महर्षि पुलस्त्य ने कहा—हे ब्रह्मन् ! इसके अनन्तर उस महान् दारुण कपाल के हाथ में स्थित होने पर भगवान् रुद्रदेव चिन्ता से आकुलित इन्द्रियों वाले होकर बहुत अधिक सन्ताप को प्राप्त हो गये थे ।।१।। इसके पश्चात् नीले अञ्जन की राशि के समान प्रभा वाली महान् भयानक स्वरूप से युक्त संरक्त केशों से समन्वित अत्यन्त शैद्रारूप वती ब्रह्म हत्या भगवान् हर के समीप में आकर प्राप्त हो गई थी ।।२।। उस आई हुई विकराल स्वरूप वाली ब्रह्म हत्या को देख कर भगवान् हर ने उससे पूछा था—तू कौन है और क्यों आई है ? तेरे इस महान् रौद्र स्वरूप से आने का क्या प्रयोजन है—यह मुझे बतलादे ।।३।। इसके अनन्तर महा दारुण स्वरूप वाली ब्रह्म हत्या कपाली से बोली—मैं ब्रह्म हत्या हूँ । हे त्रिलोचन ! मैं आपके पास आ गई हूँ अब मेरी प्रतीक्षा करो ।।४।। ब्रह्म हत्या ने इतना ही कह कर उस शिव के स्वरूप में प्रवेश कर दिया था जो अपने हाथ में त्रिशूल धारण किये हुए थे और सन्तापित विग्रह वाले महान् रुद्र स्वरूप वाले थे ।।५।। उस ब्रह्म हत्या से अभिभूत होकर भगवान् शंकर वदरिकाश्रम में आ गये थे । इसके उपरान्त वहाँ आकर ऋषि नर नारायण के दर्शन उन्होंने नहीं किये थे ।।६।। धर्म के पुत्रों का दर्शन न करके चिन्ता और शोक से युक्त होकर यमुना में स्नान करने के लिये चले गये थे किन्तु वह यमुना नदी भी शंकर को देखते ही शुष्क जल वाली हो गई थी ।।७।।

कालिन्दीं शुष्कसलिलां निरीक्ष्य वृषकेतनः ।
प्लक्षजां स्नातुमगमदन्तर्द्धानं च सा गता ॥८
ततोऽनुपुष्करारण्यं मागधारण्यमेव च ।
सैन्धवारण्यमेवासौ गत्वा श्रान्तो यदृच्छया ॥९
तथैव निमिषारण्यं धर्मारण्यं तथेश्वरः ।
स्नातो नैव च सा रौद्रा ब्रह्महत्या व्यमुञ्चत ॥१०
सरित्सु तीर्थेषु तथाऽऽश्रमेषु पुण्येषु देवायतनेषु सर्वतः ।
समाप्लुतो योगयुतोऽपि पापान्नावाप मोक्षं वृषभध्वजोऽसौ॥११
ततो जगाम निर्विण्णः शंकरः कुरुजाङ्गलम् ।
तत्र गत्वा ददर्शाथ चक्रपाणिं खगस्थितम् ॥१२
तं दृष्ट्वा पुण्डरीकाक्षं शङ्खःचक्रगदाधरम् ।
कृताञ्जलिपुटो भूत्वा हरः स्तोत्रमुदैरयत् ॥१३
नमस्ते देवतानाथ नमस्ते गरुडध्वज ।
शङ्खचक्रगदापाणे वासुदेव नमोऽस्तुते ॥१४

वृष के तन प्रभु शिव ने सूखे हुए जल वाली यमुना को देखकर फिर प्लक्षजा में स्नान करने को गमन किया था किन्तु वह भी इनको देखकर अन्तर्धान हो गई थी ॥८॥ इसके पश्चात् शिव पुष्करारण्य—मागधारण्य—सैन्धवारण्य को गये थे और उपर्युक्त स्थलों में जाकर यदृच्छा से श्रान्त हो गये थे ॥९॥ इसी प्रकार से निमिषारण्य तथा धर्मारण्य में पहुंचकर शिव ने स्नान किया था किन्तु उस महा रौद्र स्वरूप वाली ब्रह्म हत्या ने उनको नहीं छोड़ा था ॥१०॥ समस्त पवित्र नदियों में—तीर्थों में—परम पुण्य मय देवायतनों में सर्वत्र सभी ओर शिव ने स्नान एवं दर्शन किये थे । योग का भी अभ्यास किया था किन्तु भगवान् वृषभ ध्वज ने उस महान् पाप से छुटकारा प्राप्त नहीं किया था ॥११॥ इसके अनन्तर शंकर को महान् निर्वेद प्राप्त हो गया था और फिर वह कुरुजङ्गल को चले गये थे । वहाँ पर पहुँच कर गरुड़ पर संस्थित भगवान् चक्रपाणि के दर्शन शंकर भगवान् ने किये थे ॥१२॥ पुण्डरीक के समान सुन्दर नेत्रों वाले और शंख-चक्र और गदा इन आयुधों को हाथ में धारण करने वाले

भगवान् विष्णु का दर्शन करके अपने दोनों हाथों को जोड़ कर हर ने स्तोत्र का उच्चारण किया था ।।१३।। भगवान् हर ने कहा—हे सम्पूर्ण देवों के स्वामिन् ! आपकी सेवा में मेरा नमस्कार समर्पित है। हे गरुड़-ध्वज ! आपको मेरा प्रणाम है। आप शंख-चक्र और गदा को हाथों में धारण करने वाले हैं। हे वासुदेव ! आपको मेरा नमस्कार है ।।१४।।

नमस्ते निर्गुणानन्त अप्रतर्क्याय वेधसे ।
ज्ञानाज्ञाननिरालम्ब सर्वालम्ब नमोऽस्तु ते ।।१५
रजोयुक्त नमस्तेऽस्तु ब्रह्ममूर्त्ते सनातन ।
त्वया सर्वमिदं नाथ जगत्सृष्टं चराचरम् ।।१६
सत्वाधिष्ठितलोकेश विष्णुमूर्त्ते अधोक्षज ।
प्रजापाल महाबाहो जनार्दन नमोऽस्तु ते ।।१७
तमोमूर्त्ते अहं ह्येष त्वदंशक्रोधसंभवः ।
गुणाभियुक्तो देवेश सर्वव्यापिन्नमोऽस्तु ते ।।१८
भूरियं त्वं जगन्नाथ जलमम्बर पावकौ ।
वायुर्बुद्धिर्मनश्चापि शर्वरी त्वं नमोऽस्तु ते ।।१९
धर्मो यज्ञस्तपः सत्यमहिंसा शौचमार्जवम् ।
क्षमा दानं दया लक्ष्मी ब्रह्मचर्यं त्वमीश्वरः ।।२०
त्वं साङ्गाश्च चतुर्वेदास्त्वं वेद्यो वेदपारगः ।
उपवेदो भवानीश सर्वोऽसि त्वं नमोऽस्तु ते ।।२१

आप समस्त गुणों से रहित एवं अनन्त है। आपका स्वरूप प्रकृष्ट तर्क ना करने के योग्य नहीं है ऐसे वेधा आपके लिये मेरा नमस्कार है। आप ज्ञान और अज्ञान के अवलम्ब से रहित हैं और सबका अवलम्ब हैं आपके लिये मेरा नमस्कार है ।।१५।। हे रजोगुण से युक्त ! हे ब्रह्ममूर्त्ते ! आप सर्वदा से चले आने वाले हैं। आपकी सेवा में मेरा नमस्कार है। हे नाथ ! यह समस्त स्थावर जङ्गम जगत् आपके ही द्वारा रचा गया है ।।१६।। हे विष्णु मूर्त्ते ! आप सत्त्व पर अधिष्ठित रहते हैं और सम्पूर्ण लोकों के आप स्वामी हैं। हे अधोक्षज ! हे महावाले ! आप सम्पूर्ण

प्रजाजनों के पालन-पोषण करने वाले हैं। हे जनार्दन ! आपकी सेवा में मेरा प्रणाम है ।।१७।। हे तपोमूर्त्ते ! यह मैं तो आपके अंश स्वरूप क्रोध से समुत्पन्न होने वाला हूँ। हे देवेश ! मैं तो गुणों से अभियुक्त हूँ। आप तो सभी में व्यापक रहने वाले हैं। ऐसे आपके लिए मेरा नमस्कार है ।।१८।। हे जगत् के नाथ ! यह भूमि भी आप ही हैं। जल-आकाश-अग्नि-वायु-बुद्धि-मन और शर्वरी सभी आपका ही स्वरूप है। आपकी सेवा में मेरा नमस्कार है ।।१९।। धर्म्म-यज्ञ-तप-सत्य-अहिंसा-शोच-क्षमा-दान-दया-लक्ष्मी और ब्रह्मचर्य सभी आपका ही स्वरूप है। अर्थात् इन सबके ईश्वर आप ही हैं ।।२०।। आप ही का स्वरूप ये चारों वेद हैं तथा उन चारों वेदों के छै अङ्ग शास्त्र हैं। आप ही जानने के योग्य हैं और आप वेदों के पारगामी मनीषी हैं। हे भवानीश ! आप ही उपवेद हैं और सभी कुछ आप ही का स्वरूप है। आपके लिये मेरा नमस्कार है ।।२१।।

नमो नमस्तेऽच्युत चक्रपाणे नमोऽस्तु ते वासनमीनमूर्त्ते ।
लोकेभवान्कारुणिकोमतोमेत्रायस्वमांकेशवपापबन्धात् ।।२२

ममाशुभं नाशय विग्रहस्थं यद्ब्रह्महत्याभिभवं बभूव ।
दग्धोऽस्मिनष्टोऽस्म्यसमीक्ष्यकारीपुनीहिनाथोऽसिनमोनमस्ते ।।

एवं स्तुतश्चक्रधरः शंकरेण महात्मना ।
प्रोवाच भगवान्वाक्यं ब्रह्महत्याक्षयाय हि ।। २४

महेश्वर शृणुष्वेमां मम वाचं कलस्वनाम् ।
ब्रह्महत्याक्षयकरीं शुभदां पुण्यवर्द्धनीम् ।।२५

योऽसौ ब्रह्माण्डके पुण्ये मदंशप्रभवोऽव्ययः ।
प्रयागे वसते नित्यं योगशायीतिविश्रुतः ।।२६
चरणाद्दक्षिणात्तस्य विनिर्याता सरिद्वरा ।
विश्रुता वरणेत्येवं सर्वपापहरा शुभा ।।२७
सरिदन्या द्वितीयाच्च आसीरित्येव विश्रुता ।
ते उभे तु सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः ।।२८

हे अच्युत ! हे चक्रपाणे ! आपकी सेवा में मेरा बारम्बार नमस्कार है। हे वामन और मीन का स्वरूप धारण करने वाले ! आपको मेरा बारम्बार नमस्कार है। इस लोक में मैं आपको ही परम करुणा का सागर समझता हूँ। हे केशव ! अब आप ही मुझे इस पाप के बन्धन से बचाइये अर्थात् मेरी ब्रह्महत्या से रक्षा कीजिए ।।२२।। मेरे शरीर में स्थित जो यह अशुभ है उसका आप नाश कर दीजिए जो कि ब्रह्म हत्या के अभिभव से समुत्पन्न हो गया था। मैं दग्ध हो गया हूँ और एकदम नष्ट होगया हूँ। मैं असमीक्ष्यकारी हूँ। आप ही मेरे नाथ हैं। मुझे पवित्र कीजिए। मेरा आपकी सेवा में बारम्बार नमस्कार है ।।२३।। पुलस्त्य मुनि ने कहा—महात्मा शंकर के द्वारा इस प्रकार से भगवान् विष्णु की जब स्तुति की गई थी तो भगवान् विष्णु ने ब्रह्महत्या के क्षय के लिये यह वचन कहा था ।।२४।। भगवान् श्रीहरि ने कहा—हे महेश्वर ! अब आप मधुर स्वर वाली मेरी इस वाणी का श्रवण करो जो कि ब्रह्म-हत्या के नाश कर देने वाली है और शुभ प्रदान करने वाली तथा पुण्य के वर्धन करने वाली भी है ।।२५।। परम पुण्य स्वरूप ब्रह्माण्डक में यह मेरे ही अंश से समुत्पन्न अव्यय प्रयाग में नित्य निवास किया करता है और योगशायी—इस नाम से संसार में प्रसिद्ध है ।।२६।। उनके दक्षिण चरण से एक परम श्रेष्ठ सरित निकली है जो कि 'वरणा'—इस नाम से विश्रुत है। यह वरणा समस्त पापों के हरण करने वाली एवं परम शुभ है ।।२७।। दूसरे चरण से भी अन्य एक क्षरित् है जो इसी नाम से प्रसिद्ध है। ये दोनों ही नदियाँ अतीव श्रेष्ठ हैं और सम्पूर्ण लोकों की पूजा के योग्य हुई हैं ।।२८।।

तयोर्मध्ये तु यो देशस्तत्क्षेत्रं योगशायिन; ।
त्रैलोक्यप्रवरं तीर्थं सर्वपापप्रमोचनम् ।।२९
तत्तादृशाऽस्ति नगरी पुण्या वाराणसी शुभा ।
यस्यां हि भोगिनोऽपीश प्रयान्ति भवतो लयम् ।।३०
विलासिनीनां रशनास्वनेन श्रुतिस्वरो ब्राह्मण पुङ्गवानाम् ।
शुचिस्वरत्वंगुरवोनिशम्यहास्यान्विता:सन्ति मुहुर्मुहुस्ता: ।३१

व्रजत्सु योषित्सु चतुष्पथेषु पदान्यलक्तारुणि तानि दृष्ट्वा ।
ययौशशीविस्मयमेवयस्यांकिस्वित्प्रयातास्थलपद्मिनीयम् ।।३२
तुङ्गानि यस्यां सुरमन्दिराणि रुन्धन्ति चन्द्रं रजनीमुखेषु ।
दिवाऽपिसूर्यंपवनान्विताभिर्दीर्घाभिरेवंसुपताकिकाभिः ।।३३
भृङ्गाश्चयस्यां शशिकान्तभितौप्रलोभ्यमानाःप्रतिबिम्बितेषु ।
आलक्ष्ययोषिद्विमलाननाब्जेष्वीयुर्भ्रमान्नैवचपुष्पकान्तरम् ।।
परिश्रमश्चापि पराजितेषु नरेषु संमोहनखेलनेन ।
यस्यां जलक्रीडनसंगतासु नस्त्रीषु शंभो गृहदीर्घिकासु ।।३५

इन दोनों नदियों के मध्य में जो भी देश है वह सम्पूर्ण क्षेत्र योगशायी का ही है । यह त्रिभुवन में परम श्रेष्ठ समस्त पापों का प्रमोचन करने वाला तीर्थ है ।।२६।। उसी के तुल्य परमपुण्यमयी एवं अतीव शुभ वाराणसी नगरी है जिसमें निवास करने वाले भोगी पुरुष भी इस संसार से लय को प्राप्त हो जाया करते हैं अर्थात् संसार से छुटकारा पा जाते हैं ।।३०।। विलासिनियों के रसना (कटिभूषण) के शब्द के साथ श्रेष्ठ ब्राह्मणों का श्रुति का स्वर होता है । गुरु वर्ग शुचि स्वरत्व का श्रवण करते हैं तो वे बारम्बार हास्यान्वित होती हैं ।।३१।। चतुष्पथों में गमन करने वाली नारियों के चले जाने पर उनके चरणों में लगे हुए महावर के लाल चिह्नों को देखकर चन्द्रमा जिस वाराणसीपुरी में परम विस्मय को प्राप्त हो जाया करता है कि क्या यहाँ पर यह स्थलपद्मिनी ने गमन किया है अर्थात् चन्द्रमा को उन रक्तचिह्नों से स्थल कमलिनी का सन्देह हो जाया करता है ।।३२।। वह ऐसी परम सुन्दर पुरी है कि जिसमें देव मन्दिर बहुत ही ऊँचे हैं जो सन्ध्या के समय में अर्थात् रात्रि के आरम्भ काल में चन्द्रमा को भी अवरुद्ध कर दिया करते हैं । दिन के समय में भी वायु से युक्त बड़ी विशाल पताकाओं से सूर्य्य को भी समावृत कर दिया जाता है ।।३३।। जिस पुरी में भृङ्ग (भौंरे) चन्द्रकान्त मणियों की निर्मित भित्तियों पर प्रतिबिम्बित ललनाओं के विमल मुखों पर प्रलोभ्यमान (ललचाये हुए) उन्हें देखकर भ्रम से अन्य पुरुषों पर नहीं जाया करते हैं ।।३४।। वह वाराणसी पुरी ऐसी है कि जिसमें संमो-

हन क्रीड़ा से पराजित नरों के विषय में घर की दीर्घिकाओं (वापी) में जल की क्रीड़ाओं में सगत स्त्रियों में हे शम्भो ! परिश्रम भी नहीं होता है ॥३५॥

न चैव कश्चित्परमन्दिराणि रुणद्धि शंभो सह मारुतेन ।
नचाबलानांतरसापराक्रमंकरोतियस्यांसुरतंहिमुक्त्वा ॥३६
पाशग्रन्थिर्गजेन्द्राणां दानच्छेदो मदच्युतौ ।
यस्यां मानमदौ पुंसां करिणांयौवनागमे ॥३७
प्रियदोषाः सदा यस्यां कौशिकानेतरे जनाः ।
तारागणेऽकुलीनत्वं मेघ वृत्तच्युतिर्विभो ॥३८
भूतिलुब्धा विलासिन्यो भुजगपरिवारिताः ।
चन्द्रभूषितदेहाश्च यस्यां त्वमिवशंकर ॥३९
ईदृशायां सुरेशान वाराणस्यां मदाश्रमे ।
वसते भगवाँल्लोलः सर्वपापहरो रविः ॥४०
दशाश्वमेध यत्प्रोक्तं मदंशो यत्र केशवः ।
तत्र गत्वासुरश्रेष्ठ पापमोक्षमवाप्स्यसि ॥४१
इत्येवमुक्तो गरुडध्वजेन वृषध्वजस्तं शिरसा प्रणम्य ।
जगामवेगाद्गरुडोयथाऽसौवाराणसींपापविमोचनाय ॥४२

हे शम्भो ! वहाँ पर मारुत के साथ कोई भी पर मन्दिरों का अवरोध नहीं करता है और जिस वाराणसीपुरी में अबलाजनों पर सुरत को छोड़ कर कोई भी अपना पराक्रम नहीं किया करता है ॥३६॥ जिस वाराणसी पुरी में केवल गजेन्द्रों की ही पाश ग्रन्थि होती है और मदच्युति में ही दानच्छेद हुआ करता है। पुरुषों और हाथियों का मान तथा मद यौवन के आगम के समय में ही होता है ॥३७॥ जिस पुरी में सर्वदा दोषों से प्यार करने वाले कौशिक ही होते हैं इतर (अन्य) पुरुषों को दोष प्रिय नहीं होते हैं। अकुलीनत्व केवल तारागण में ही होता है और मेघ में हे विभो ! वृत्तच्युति हुआ करती है ॥३८॥ वाराणसी पुरी में विलासिनी नारियाँ भूति (भस्म—ऐश्वर्य) की लुब्धक तथा भुजङ्गों (विलासी-सर्प) से परिवारित (घिरी हुई) होती हैं। हे शङ्कर ! आपकी

ही भाँति वहाँ पर समस्त नारियाँ चन्द्र से भूषित (चन्द्र के समान अथवा मुखरूपी चन्द्र से शोभित) देहों वाली होती हैं ।।३६।। हे सुरेशान ! इस प्रकार की वाराणसी पुरी में मेरे आश्रम में सम्पूर्ण पापों के हरण करने वाले भगवान् लोल रवि निवास किया करते हैं ।।४०।। जो दशाश्वमेघ कहा गया है वह मेरा ही अंश केशव है । हे सुरश्रेष्ठ ! वहाँ पर जाकर आप अपने किये हुए पाप से मोक्ष प्राप्त करेंगे ।।४१।। इस प्रकार से भगवान् गरुड़ध्वज के द्वारा जब वृषभध्वज से कहा गया था तो भगवान् शङ्कर ने उनको प्रणाम किया था और फिर वह गरुड़ के ममान वेग से अपने पापों के विमोचन करने के लिये वाराणसी में चले गये थे ।।४२।।

गत्वा सुपुण्यां नगरीं सुतीर्थां दृष्ट्वा च लोलं स दशाश्वमेधम् ।
स्नात्वा च तीर्थेषु विमुक्तपापः स केशवं द्रष्टुमुपाजगाम ।।४३

केशवं शंकरो दृष्ट्वा प्रणिपत्येदमब्रवीत् ।
त्वत्प्रसादाद्धृषीकेश ब्रह्महत्या क्षयं गता ।।४४
नेदं कपालं देवेश मद्धस्तं परिमुञ्चति ।
कारणं वेद्मिनैवैतत्तन्मे त्वं वक्तुमर्हसि ।।४५
महादेववचः श्रुत्वा केशवो वाक्यमब्रवीत् ।
विद्यते कारणं वत्स तत्सर्वंकथयामि ते ।।४६
योऽसौ ममाग्रतो दिव्यो ह्रदः पद्मोत्पलैर्वृतः ।
एष तीर्थवरः पुण्यो देवगन्धर्वपूजितः ।।४७
एतस्मिन्प्रवरे पुण्ये स्नान शोभनमाचर ।
स्नातमात्रस्य चाद्यैव कपाल परिमोक्ष्यति ।।४८

ततः कपाली लोके च ख्यातो रुद्र भविष्यसि ।
कपालमोचनेत्येवं तीर्थं चेदं भविष्यति ।।४९

एवमुक्तः सुरेशेनकेशवेन महेश्वरः ।
कपालमोचने सस्नौ वेदोक्तविधिना मुने ।।५०

स्नातस्य तीर्थे त्रिपुरान्तकस्य परिच्युतं हस्ततलात्कपालम् ।
नाम्ना बभूवाथ कपालमोचनं तत्तीर्थवर्यं भगवत्प्रसादात् ।।५१

उस परम पुण्यमयी एवं सुन्दर तीर्थों वाली वाराणसी नगरी में जाकर शंकर ने वहाँ पर लोल और दशाश्वमेध का दर्शन किया था। तीर्थों में स्नान करके पापों से विमुक्त होकर फिर भगवान् शंकर केशव के दर्शन करने के लिये गये थे ।।४३।। शंकर ने भगवान् केशव का दर्शन करके उनको प्रणाम किया और यह वचन बोले—हे हृषीकेश! आपके प्रसाद से ही मेरी ब्रह्महत्या नष्ट हुई है ।।४४।। हे देवेश! किन्तु यह कपाल अभी भी मेरे हाथ को नहीं छोड़ता है। मैं इसका कुछ भी कारण नहीं जानता हूँ। आप ही कृपा करके मुझे बतलाने के योग्य हैं ।।४५।। पुलस्त्य मुनि ने कहा—महादेव के इस वचन का श्रवण करके भगवान् केशव यह वाक्य कहने लगे। हे वत्स! इसमें कुछ कारण है, वह सभी अब मैं तुमको बतलाता हूँ ।।४६।। जो यह मेरे आगे एक दिव्य ह्रद पद्म और उत्पलों से समावृत है। यह परम पुण्यमय देव तथा गन्धर्वों से पूजित एक अतीव श्रेष्ठ तीर्थ है ।।४७।। इस परम प्रवर पुण्यमय तीर्थ में आप शोभन स्नान करिये। स्नान भर करने ही से आज ही यह हाथ में संलग्न कपाल आपके हाथ को छोड़ देगा ।।४८।। इसके अनन्तर भी आप लोक में कपाली रुद्र—इस नाम से प्रसिद्ध होंगे। यह तीर्थं 'कपाल मोचन'—इस नाम से प्रसिद्धि प्राप्त करेगा ।।४९।। पुलस्त्य मुनि ने कहा—देवों के स्वामी केशव भगवान् के द्वारा इस प्रकार से जब महेश्वर से कहा गया तो हे मुने! उन्होंने वेद में वर्णित विधि से उस कपाल मोचन तीर्थ में स्नान किया था ।।५०।। उस तीर्थ में स्नान करने वाले त्रिपुरान्तक के हस्ततल से वह कपाल च्युत हो गया था। भगवान् के प्रसाद से वह श्रेष्ठ तीर्थ कपाल मोचन नाम से विश्रुत हो गया था ।।५१।।

४–हरि-वीरभद्र युद्ध वर्णन

एवं कपाली संजातो देवर्षे भगवान्हरः।
अनेन कारणेनासौ दक्षेण न निमन्त्रितः ।।१

एतस्मिन्नन्तरे देवीं द्रष्टुं गौतमनन्दिनी ।
जया जगाम शैलेन्द्रं मन्दरं चारुकन्दरम् ॥२
तामागतां सती दृष्ट्वा जयामेकामुवाच ह ।
किमर्थं विजया नागाज्जयन्ती चापराजिता ॥३
सा देव्या वचनं श्रुत्वा उवाच परमेश्वरी ।
गता निमन्त्रिताः सर्वा मखे मातामहस्य ताः ॥४
समं पित्रा गौतमेन मात्रा चैवाप्यहल्यया ।
अहं समागता द्रष्टुं त्वां तत्र गमनोत्सुका ॥५
किं त्वं न व्रजसे तत्र तथा देवो महेश्वरः ।
नामन्त्रिताऽसि तातेन उताहोस्विद्व्रजिस्यसि ॥६
गतास्तु ऋषयः सर्वे ऋषिपत्न्यस्तथा सुराः ।
मातृष्वसः शशांकश्च सपत्नीको गतः क्रतुम् ॥७

श्री पुलस्त्य महर्षि ने कहा—हे देवर्षे ! इस प्रकार से वह कपाली भगवान् हर हो गये थे । इसी कारण से प्रजापति दक्ष ने उनको अपने यज्ञ में निमन्त्रण नहीं दिया था ॥१॥ इसी बीच में देवी का दर्शन करने के लिये गौतमनन्दिनी जया सुन्दर कन्दराओं वाले शैलेन्द्र मन्दराचल पर गई थी ॥२॥ वहाँ पर आई हुई उस अकेली जया को देख कर सती ने उससे कहा था कि विजया जयन्ती और अपराजिता किसलिये यहाँ नहीं आई हैं ? उसने देवी के इस वचन का श्रवण कर वह परमेश्वरी से कहने लगी कि वे सब मातामह के यज्ञ में निमन्त्रित होकर वहाँ पर चली गई हैं । पिताजी महर्षि गौतम के तथा माता अहिल्या के साथ सब यज्ञोत्सव देखने के लिये गई हैं । वहाँ पर जाने के समुत्सुक मैं भी हूँ केवल आपसे मिलने के लिये यहाँ पर चली आई हूँ ॥३–५॥ क्या आप वहाँ पर नहीं चल रही हो तथा देव महेश्वर भी वहाँ यज्ञ में नहीं जा रहे हैं ? क्या पिताजी ने आपको आमन्त्रित नहीं किया है या आप जायेंगी ? ॥६॥ सभी ऋषिगण और ऋषियों की पत्नियाँ भी गई हैं तथा सभी सुरवृन्द वहाँ गये हैं । मौसेरा भाई शशांक अपनी पत्नी को साथ लेकर वहाँ यज्ञ में गया है ॥७॥

चतुर्द्दशसु लोकेषु जन्तवो ये चराचरा: ।
निमन्त्रिता: क्रतौ सर्वे किं वा त्वं न निमन्त्रिता ।।८
जयायास्तद्वच: श्रुत्वा वज्रपातोपमं सती ।
मन्युनाऽभिप्लुता ब्रह्मन्पञ्चत्वमगमत्तदा ।।९
जया मृतां सतीं दृष्ट्वा क्रोधशोकपरिप्लुता ।
मुञ्चती वारि नेत्राभ्यां सुस्वरं विललाप ह ।।१०
आक्रन्दितध्वनिं श्रुत्वा शूलपाणिस्त्रिलोचन: ।
आ: किमेतदितीत्युक्त्वा जयाम्यासमुपागत: ।।११
आगतो दद्दशे देवीं लतामिव वनस्पते: ।
कृत्तां परशुना भूमौ श्लथाङ्गीं पतितां सतीम् ।।१२
देवीं निपतितां दृष्ट्वा जयां प्रपच्छ शंकर: ।
किमयं पतिता भूमौ निकृत्तेव लता सती ।।१३
सा शंकर वच: श्रुत्ता जया वचनमब्रवीत् ।
श्रुत्वा मखे च स्वावज्ञां भगिन्य: पतिभि: सह ।।१४
आदित्यास्त्रिषु लोकेषु समं शक्रादिभि: सुरै: ।
मातृष्वसा विपन्नेयमन्तर्दु:खेन दह्यति ।।१५

चौदह भुवनों में जो भी चर और अचर जन्तु हैं वे सभी आमन्त्रित किये गये हैं। उस क्रतु में जब सभी को निमन्त्रण दिया गया है तो क्या आपको ही निमन्त्रित नहीं किया गया है ? ।।८।। पुलस्त्य मुनि ने कहा—जया के इस वचन को, जो कि एक वज्रपात के ही समान था, श्रवण करके हे ब्रह्मन् ! सती को इतना अधिक क्रोध आया कि उससे अभिप्लुत होकर उसी समय में सती पञ्चत्व को प्राप्त हो गई थीं ।।९।। जया ने जब देखा कि सती मृत्युगत हो गई है तो वह भी क्रोध और शोक से परिप्लुत हो गई थी। उसके दोनों नेत्रों से अश्रुपात करते हुए वह उच्च स्वर से विलाप करने लगी ।।१०।। उसके इस क्रन्दन की ध्वनि का श्रवण करके शूलपाणि भगवान् त्रिलोचन ने कहा—यह क्या हो गया है—इतना कहकर फिर भगवान् शंकर जया के समीप में पहुँचे थे ।।११।। वहाँ पर आये हुए शिव ने देवी को फरसा से काटी हुई

वनस्पति की लता की भाँति भूमि पर पड़ी हुई शिथिल अंगों वाली सती को देखा था ।।१२।। उस देवी को इस प्रकार से भूमि पर निपतित देख कर शंकर ने जया से पूछा था कि क्या कारण हुआ जिससे यह सती काटी हुई लता के समान भूमि पर गिर गई है ? ।।१३।। उस जया ने भगवान् शंकर के इस वचन का श्रवण कर यह वचन शंकर से कहा—अपने पतियों के साथ सभी बहिन मखोत्सव में सम्मिलित होने को गई हैं और अपनी अवज्ञा निमन्त्रण न पाने के कारण जो हुई है उसका श्रवण करके ही अन्तर्दुःख से दग्ध होती हुई यह मातृस्वसा विपन्न हो गई है क्योंकि तीन लोक में शक्र आदि सुरगणों के सहित आदित्य भी उसमें सम्मिलित होने को जा रहे हैं ।।१४-१५।।

तच्छ्रुत्वाऽथ वचो रौद्रं रुद्रः क्रोधाप्लुतो बभौ ।
क्रुद्धस्य सर्वगात्रेभ्यो निश्चेरुः पावकार्चिषः ।।१६
ततः क्रोधाल्लिनेत्रस्य गात्ररोमोद्भवा मुने ।
गणाः सिंहमुखा जाताः वीरभद्र पुरोगमा ।।१७
गणैः परिवृतस्तस्मान्मन्दराद्धिमसाह्वयम् ।
ततः कनखलं तस्माद्यत्र दक्षोऽयजत्क्रतुम् ।।१८
ततो गणानामधिपो वीरभद्रो महाबलः ।
दिशि प्रत्युत्तरायां च तस्थौ शूलधरो मुने ।।१९
जया क्रोधाद्गदां गृह्य पूर्वं दक्षिणतः स्थिता ।
मध्ये त्रिशूलभृच्छर्वस्तथौ क्रुद्धौ महाक्रतौ ।।२०
मृगारिवदनं दृष्ट्वा देवा शक्र पुरोगमाः ।
ऋषयो देवगन्धर्वाः किमिदं त्वित्यचिन्तयन् ।।२१

पुलस्त्य मुनि ने कहा—इसके अनन्तर इस अतीव रौद्र वचन को श्रवण करके भगवान् रुद्र भी क्रोध से आप्लुत होकर शोभित हो गये थे । अत्यन्त क्रुद्ध शंकर के समस्त अंगों से अग्नि की अर्चियाँ निकल रही थीं ।।१६।। हे मुने ! इसके पश्चात् क्रोध से भगवान् त्रिनेत्र के गात्र के रोमों से समुत्पन्न सिंह के समान मुख वाले गण पैदा हो गये थे जिनमें वीरभद्र सबका गणनायक था ।।१७।। उस समय शंकर गणों

से परिवृत हो गये थे। मन्दराचल से हिमसाह्वय तक और इसके आगे कनखल और उससे आगे उस स्थान तक जहाँ तक दक्ष प्रजापति यज्ञ कर रहे थे सर्वत्र गण फैल गये थे ॥१८॥ हे मुने! इसके अनन्तर महान् बलशाली गणों के स्वामी वीरभद्र शूल धारण करके उत्तर दिशा की ओर अवस्थित हो गया था ॥१९॥ जया क्रोध से गदा को ग्रहण करके दक्षिण दिशा की ओर स्थित हो गई थी। मध्य भाग में त्रिशूल धारण करके भगवान् शंकर उस महाक्रतु में अत्यन्त क्रुद्ध होकर स्थित हो गये थे ॥२०॥ इन्द्र आदि प्रमुख देवगण मृगारि वदन को देखकर तथा समस्त ऋषिवृन्द और गन्धर्वगण यह सोचने लगे थे कि यह क्या कारण उपस्थित हो गया है जिससे कि यह यज्ञभूमि को इस प्रकार से समाक्रान्त कर लिया गया है ॥२१॥

ततस्तु धनुरादाय शरानाशीविषोपमान् ।
द्वारपालस्तदा धर्मो वीरभद्रमुपाद्रवत् ॥२२
तमापतन्तं सहसा धर्मं दृष्ट्वा गणेश्वरः ।
करेणैकेन जग्राह त्रिशूलं वज्रसन्निभम् ॥२३
कार्मुकं च द्वितीयेन तृतीयेनाथ मार्गणान् ।
चतुर्थेन गदां गृह्य धर्ममभ्यद्रवद्गणः ॥२४
ततश्चतुर्भुजं दृष्ट्वा धर्मराजो गणेश्वरम् ।
तस्थावष्टभुजो भूत्वा नानायुध धरोऽव्यय ॥२५
खड्गचर्म्मगदाप्रासपरश्वधवरांकुशैः ।
चापमार्गणभृत्तस्थौ हन्तुकामो गणेश्वरम् ॥२६
गणेश्वरोऽपि संक्रुद्धो हन्तुं धर्म्मं सनातनम् ।
ववर्ष मार्गणांस्तीक्ष्णान्यथा प्रावृषि तोयदः ॥२७
तावन्योन्यं महात्मानौ शरचापधरौ मुने ।
रुधिरारुणसिक्ताङ्गौ किंशुकाविव रेजतुः ॥२८

इसके अनन्तर द्वार पर रक्षा करने वाले धर्म ने सूर्य के समान शरों को और धनुष को ग्रहण करके उस समय में वीरभद्र से युद्ध किया था ॥२२॥ सम्पूर्ण गणों के स्वामी वीरभद्र ने धर्म को सहसा अपने ऊपर

आक्रमण कारी देखा तो उसने अपने एक हाथ से त्रिशूल ग्रहण किया था जोकि वज्र के सदृश था ।।२३।। दूसरे हाथ में कार्मुक ग्रहण किया था और तीसरे हाथ में बाणों को ग्रहण किया था। चौथे हाथ में गदा ले ली थी और फिर उसने धर्म्म के साथ घोर युद्ध किया था ।।२४।। इसके अनन्तर धर्मराज ने गणेश्वर को चार भुजाओं वाला आठ भुजाओं से युक्त हो गया था ।।२५।। खड्ग–चर्म–गदा–प्रास–परशु-अधवर-अंकुश और चापमार्गण इन सबको धारण करके गणेश्वर का हनन करने की इच्छा की थी ।।२६।। उधर गणेश्वर वीरभद्र भी अत्यन्त संक्रुद्ध होकर सनातन धर्म के हनन करने के लिये उतारू हो गया था। उसने अपने अत्यन्त तीक्ष्ण वाणों की वर्षा की थी जिस तरह वर्षा काल में मेघ जल की धाराऐं छोड़ा करता है ।।२७।। हे मुने ! वे दोनों ही परस्पर में महान् आत्मा वाले शरों और चापों को धारण करने वाले युद्ध करते हुए रुधिर से अरुण एवं सिक्त अङ्गों वाले होगये थे और किंशुक वृक्षों के समान शोभित हो रहे थे ।।२८।।

मृधे वरास्त्रैर्गणनायकेन जितः स धर्मस्तरसा प्रसह्य ।
पराङ्मुखोऽभूद्विमनामुनीन्द्रसवीरभद्रःप्रविवेशयज्ञम् ।।२९
यज्ञवाटं प्रविष्टं तु वीरभद्रं गणेश्वरम् ।
दृष्ट्वा तु सहसा देवा उत्तस्थुः सायुधा मुने ।।३०
वसवोऽष्टौ महाभागा ग्रहा नव सुदारुणाः ।
इन्द्राद्याद्वादशादित्या रुद्रास्त्वेकादशैव हि ।।३१
विश्वे देवाश्च साध्याश्च सिद्धगन्धर्वपन्नगाः ।
यक्षाः किंपुरुषा भूताःखगाश्चक्रधरास्तथा ।।३२
नृपा वैवस्वताद्वंशाद्विविधा ये च विश्रुताः ।
सोमवंशोद्भवाश्चान्ये भोजकीर्तिमहीभुजः ।।३३
दितीजा दानवाश्चान्ये येऽन्ये तत्र समागताः ।
ते सर्वेऽप्यद्र वत्रौद्रं वीर भद्रमुदायुधाः ।।३४
तानापतत एवाशु बाणचापधरो गणः ।
अभिदुद्राव वेगेन सर्वानेव शरोत्करैः ।।३५

उस महान् दारुण युद्ध में गणों के नायक वीरभद्र अपने श्रेष्ठ अस्त्रों के प्रयोग के द्वारा वेग के साथ बल पूर्वक उस धर्म को जीत लिया था और उदास होकर वह द्वार पर रक्षा करने वाला धर्म पराङ्मुख होगया था। हे मुनीन्द्र ! फिर उस वीरभद्र ने उस यज्ञ में अन्दर प्रवेश कर दिया था ॥२९॥ उस यज्ञ वाट में गणेश्वर वीरभद्र को देखकर हे मुनिवर ! कि वह अन्दर प्रवेश कर चुका है सभी देवगण जो वहाँ पर संस्थित थे अपने २ आयुधों के साथ सहसा उठ खड़े हुए थे ॥३०॥ आठों वसुगण-महान् भाग वाले अत्यन्त दारुण नौ ग्रह—इन्द्र प्रभृति बारह आदित्य और एकादश रुद्रगण—विश्वेदेवा—साध्य—सिद्ध—गन्धर्व—पन्नग—यक्ष—किम्पुरुश—भूत—खग तथा चक्रधर सभी उठकर खड़े हो गये थे ॥३१-३२॥ वैवस्वत वंश से दो प्रकार के नृपगण थे जोकि प्रसिद्ध हैं। एक तो सोमवंश में समुत्पन्न होने वाले हैं और दूसरे भोज की कीर्त्ति करने वाले राजा लोग हैं ॥३३॥ दिति से समुत्पन्न दानव लोग और जो अन्य लोग थे और वहाँ पर समागत हुए थे। वे सभी लोग उस महान् रौद्र रूप वाले वीरभद्र पर अपने २ आयुध ग्रहण करके टूट पड़े थे ॥३४॥ उस वीरभद्र महान् गणों के स्वामी ने उन सबको अपना चाप तथा वाण धारण कर शीघ्र ही गिरा दिया था और अपने शरों के समूह के द्वारा बड़े वेग के साथ उस गणेश्वर ने सभी के साथ युद्ध किया था ॥३५॥

ते शस्त्रवर्षमतुलं गणेशाय समुत्सृजन् ।
गणेशोऽपि वरास्त्रैस्तांश्चिच्छेद च बिभेद च ॥३६
शरैः शस्त्रैश्च सततं वध्यमाना महात्मना ।
वीरभद्रेण देवाद्यास्त्ववहारमरोचयन् ॥३७
ततो विवेश गणपो यज्ञमध्यं सुविस्तृतम् ।
जुह्वाना ऋषियो यत्र हवींषि प्रत्यबन्धत ॥३८
ततो महर्षयो दृष्टवा मृगेन्द्रवदनं गणम् ।
भीता होत्रं परित्यज्य जग्मुः शरणमच्युतम् ॥३९
तानार्तांश्चक्रभृद्दृष्ट्वा महर्षींस्त्रस्तमानसान् ।
न भेतव्यमितीत्युक्त्वा समुत्तस्थौ वरायुधः ॥४०

समानम्य ततः शार्ङ्गं शराना शीविषोपमान् ।
मुमोच वीरभद्राय कायावरणदारणान् ॥४१
ते तस्य कायमासाद्य अमोघा वै हरेः शराः ।
निपेतुर्भुवि भग्नाशा नास्तिकादिव याचकाः ॥४२

उन सब ने अपने अतुल शरों की वर्षा गणेश्वर पर की थी किन्तु वीरभद्र ने भी अपने श्रेष्ठतम अस्त्रों के द्वारा उन सबको काट डाला था और भेदन कर दिया था ॥३६॥ निरन्तर शस्त्रों और शरों के द्वारा बाध्यमान होकर जोकि महान् आत्मा वाले वीरभद्र के द्वारा प्रयुक्त किये गये थे सभी देव आदि ने अपना पराजय ही ठीक समझा था ॥३७॥ इसके अनन्तर वह गणेश्वर वीरभद्र उस महान् विस्तार वाले यज्ञ के मध्य में प्रविष्ट हुआ था, जहाँ पर ऋषिवृन्द हवन करते हुए हवियों को लेकर संस्थित थे ॥३८॥ इसके अनन्तर उन महर्षि गण ने मृगेन्द्र (सिंह) के समान मुख वाले वीरभद्र गण को देखा था। वे सब उसे देखकर अत्यन्त भयभीत हो गये और सब ने उस अग्नि में हवन करने के कार्य को छोड़ कर भगवान् अच्युत की शरण ग्रहण की थी ॥३९॥ चक्रधारी प्रभु ने उन सब आर्त्तों को देखकर जो महर्षि गण त्रस्त मन वाले हो रहे थे प्रभु ने उनसे कहा—तुम सब डरो मत, इतना उनसे कह कर स्वयं अपने श्रेष्ठ आयुध ग्रहण कर उसके सामने समुपस्थित होगये थे ॥४०॥ भगवान् हरि ने इसके उपरान्त अपने शार्ङ्ग धनुष को समानमित करके आशीविष (सर्प) के समान शरों को जोकि काया के आवरण को चीर देने वाले थे वीरभद्र के ऊपर छोड़े थे ॥४१॥ वे श्रीहरि के शर जो अमोघ थे उस वीरभद्र की काया में पहुँचकर नास्तिक पुरुष से याचना करने वाले की भांति भग्न आशा वाले होकर भूमि पर गिर पड़े थे ॥४२॥

शरांस्त्वमोघान्मोघत्वमापन्नान्वीक्ष्य केशवः ।
दिव्यैरस्त्रैर्वीरभद्रं प्रच्छादयितुमुद्यतः ॥४३
तानस्त्रान्वासुदेवेन प्रक्षिप्तान्गणनायकः ।
वारयामास शूलेन गदया मार्गणैस्तथा ॥४४

दृष्ट्वा विपन्नान्यस्त्राणि गदां चिक्षेप माधवः ।
त्रिशूलेन समाहृत्य पातयामास भूतले ।।४५

तां गदां विफलां दृष्ट्वा लाङ्गलं प्राक्षिपद्धरिः ।
लाङ्गलं च गणेशोऽपि गदया प्रत्यवारयत् ।।४६

मुसलं वीरभद्राय संचिक्षप हलायुधः ।
पूर्ववन्मुसलाघातं वीरभद्रो न्यवारयत् ।।४७

मुसलं संहतं दृष्ट्वा लाङ्गलं च निवारितम् ।
वीरभद्रायचिक्षेप चक्रं क्रोधात्खगध्वजः ।।४८

तमापतन्तं शतसूर्यकल्पं सुदर्शनं प्रेक्ष्य गणेश्वरस्तु ।
शूलं परित्यज्य जगार चक्रं तथा मधुं मीनवपुः सुरेन्द्रः ।।४९

भगवान् केशव ने जब देखा कि उनके वे अमोघ शर भी मोघता (विफलता) को प्राप्त होगये हैं तो फिर उन्होंने अपने दिव्य अस्त्रों के द्वारा वीरभद्र को प्रच्छादित करने के लिए उद्योग किया था ।।४३।। उस गणनायक ने वासुदेव भगवान् के द्वारा प्रक्षिप्त उन अस्त्रों को अपने शूल-गदा और शरों से वारित किया था ।।४४।। भगवान् केशव ने अपने-अपने सभी अस्त्रों को विपन्न देखकर फिर माधव प्रभु ने अपनी गदा का प्रक्षेप किया किन्तु उसको भी उस गणेश्वर ने त्रिशूल से समाहृत कर भूतल पर गिरा दिया था ।।४५।। श्री हरि ने उस अपनी गदा को जब विफल देखा था तो फिर लाङ्गल का प्रक्षेप किया था । उस लाङ्गल का भी गणेश्वर ने अपनी गदा से प्रतिवारण कर दिया था ।।४६।। हलायुध ने फिर वीरभद्र पर अपने मुसल को प्रक्षिप्त किया था किन्तु उस वीरभद्र ने पूर्व की ही भाँति उस मुसल के आघात का भी वारण कर दिया था ।।४७।। गरुड़ध्वज प्रभु ने अपने प्रक्षिप्त किये हुए मुसल को संहत देखा और लाङ्गल को निवारित देखा तो फिर उन्हें महान् क्रोध आ गया था और फिर वीरभद्र पर बड़े ही कोप से सुदर्शन चक्र का प्रहार किया था ।।४८।। उस शत सूर्यों के समान महान् तेज से युक्त चक्र को अपने ऊपर आता हुआ देखकर गणेश्वर ने अपने शूल को

छोड़ दिया था और उस चक्र को मीन वपु सुरेन्द्र द्वारा मधु की भाँति उसने निगल लिया था ॥४६॥

चक्रे निगीर्णे गणनायकेन क्रोधातिरक्ताऽसितचारुनेत्रः ।
मुरारिरभ्येत्य गणाधिपेन्द्रमुत्क्षिप्य वेगाद्भुवि निष्पिपेष ॥५०
हरिबाहूरुवेगेन विनिष्पिष्टस्य भूतले ।
सहितं रुधिरोद्गारैर्मुखाच्चक्रं विनिर्गतम् ॥५१
ततो निःसृतमालोक्य चक्रं कैटभनाशनः ।
समादाय हृषीकेशो वीरभद्रं मुमोच ह ॥५२
हृषीकेशेन मुक्तस्तु वीरभद्रो जटाधरम् ।
गत्वा निवेदयामास वासुदेवात्पराजयम् ॥५३
ततो जटाधरो दृष्ट्वा गणेशं शोणिताप्लुतम् ।
निश्वसन्त यथा नागं क्रोधं चक्रे तदाऽव्ययः ॥५४
ततः क्रोधाभिभूतेन वीरभद्रोऽथ शंभुना ।
पूर्वोद्दिष्टे तदा स्थाने सायुधस्तु निवेशितः ॥५५
वीरभद्रमथादिश्य भद्रकालीं च शंकरः ।
विवेश क्रोधताम्राक्षो यज्ञवाटं त्रिशूलभृत् ॥५६
ततस्तु देवप्रवरे जटाधरे त्रिशूलपाणौ त्रिपुरान्तकारिणि ।
दक्षस्ययज्ञं विशतिक्षयंकरेजातोमुनीनांप्रवरोहि साध्वसः ॥५७

गण नायक के द्वारा उस सुदर्शन चक्र को निगीर्ण कर जाने पर क्रोध से अत्यन्त रक्त एवं असित चारु नेत्रों वाले मुरारि ने उस गणाधिप को ऊपर उठा कर बड़े वेग से भूमि पर निष्पिष्ट कर दिया था ॥५०॥ श्रीहरि के बाहुओं के महान् वेग से भूतल पर विशेष रूप से निष्पिष्ट उस गणेश्वर के मुख से रुधिर के उद्गारों के सहित वह सुदर्शन चक्र बाहिर निकल आया था ॥५१॥ इसके अनन्तर कैटभदैत्य के संहार करने वाले प्रभु ने जब देखा कि उनका सुदर्शन चक्र बाहर निकल आया है तो फिर हृषीकेश ने पुनः उस वीरभद्र को छोड़ दिया था ॥५२॥ भगवान् हृषी-केश के द्वारा मुक्त किया हुआ वीरभद्र जटाधर के समीप में पहुंच कर

भगवान् वासुदेव से अपने पराजय को निवेदन किया था ॥५३॥ इसके उपरान्त जटाधर प्रभु ने अपने गणेश्वर वीरभद्र को जब शोणित से आप्लुत (लोहू लुहान) देखा था और वह एक क्रोधित नाग की भाँति उस समय में श्वास ले रहा था तो उस समय में शम्भु ने महान् क्रोध किया था ॥५४॥ इसके अनन्तर क्रोध से अभिभूत शम्भु ने उस वीरभद्र को उस समय में पूर्वोद्दिष्ट स्थान में आयुधों के सहित निवेशित कर दिया था ॥५५॥ इसके अनन्तर उस वीरभद्र को आदेश देकर तथा भद्रकाली को आज्ञा प्रदान करके फिर भगवान् शकर क्रोध से लाल नेत्रों वाले होकर तथा त्रिशूल धारण कर उस यज्ञ भूमि में स्वयं ही प्रविष्ट हुए थे ॥५६॥ इसके उपरान्त समस्त देवों में परम श्रेष्ठ देव, त्रिपुर दैत्य के संहार करने वाले, त्रिशूल हाथ में धारण किये हुए, जटाधारी और सबका क्षय करने वाले शम्भु को यज्ञ भूमि में प्रवेश करते हुए देखा तो उस समय में समस्त मुनियों को बहुत ही अधिक भय समुत्पन्न हो गया था ॥५७॥

५—शिवजी का कालस्वरूप वर्णन

जटाधरं हरिर्दृष्ट्वा क्रोधादारक्तलोचनम् ।
तस्मात्स्थानादपाक्रम्य कुब्जाम्रेऽन्तर्हितः स्थितः॥१
वसवोऽष्टौ हरं दृष्ट्वा ससृपुर्वेगतोमुने ।
सा तु जाता सरिच्छ्रेष्ठा सीता नाम सरस्वती ॥२
एकादश तथा रुद्रास्त्रिनेत्रा वृषकेतनाः ।
कान्दिशीका लयं जग्मुः समभ्येत्याथ शंकरम् ॥ ३
विश्वेऽश्विनौ च साध्याश्च मरुतोऽनलभास्कराः ।
समासाद्य पुरोडाशं भक्ष्यन्तो महामुने ॥४
चन्द्रः समं चर्क्षगणैर्निशां समुपदर्शयन् ।
उत्पत्यारुह्य गगनं स्वमधिष्ठानमास्थितः ॥५

कश्यपाद्याश्च ऋषयो जपन्तः शतरुद्रियम् ।
पुष्पाञ्जलिपुटा भूत्वा प्रणताः संस्थिता मुने ॥ ६
असकृद्दक्षदयिता दृष्ट्वा रुद्रं बलाधिकम् ।
शक्रादीनां सुरेशानां कृपणं विललाप ह ॥७

वरदोऽस्मीत्यथेत्युक्तो कुरुर्वरमयाचत ।
यावदेतन्मया कृष्टं धर्मक्षेत्रं तदस्तु वः ॥३३
स्नातानां च मृतानां च महापुण्यफलंत्विह ।
उपवासश्च दानं च स्नानं जप्यं च माधव ॥३४
होमयज्ञादिकं चान्यच्छुभं वाऽप्यशुभं विभो ।
त्वत्प्रसादाद्धृषी केश शङ्खचक्रगदाधर ॥३५
अक्षयं प्रवरे क्षेत्रे भवत्वत्र महाफलम्।
तथा भवान्सुरैः सार्द्धं समं देवेन शूलिना ॥३६
वसात्र पुण्डरीकाक्ष मन्नामव्यञ्जकेऽच्युत ।
इत्येवमुक्तस्तेनाह राज्ञा बाढमुवाच तम् ॥३७

उसने फिर मुझ से कहा था कि वह बीज मेरे देह में स्थित है । तब मैंने उससे कहा था कि उसे मुझे दो ! मैं उस बीज का वपन करूँगा और आप हलका कर्षण करना ॥२६॥ इसके पश्चात् उस राजा ने अपना दक्षिण बाहु प्रसृत कर दिया था । उस फैलाये हुए भुजा को देखकर महान् चक्र से वेग के साथ सहस्र टुकड़ों में काट दिया था और फिर वह राजा एक ही भुजा वाला रह गया था । इसके पश्चात् उस राजा ने अपना सव्य भुजा भी दे दिया था । उसको भी मैंने छिन्न कर दिया था ॥३०-३१॥ उसी भाँति उसने अपने दोनों अरु भी देदिये थे और मेरे द्वारा वे भी काट डाले गये थे । इसके अनन्तर उसने अपना शिर देदिया था । उससे मैं परम प्रसन्न उस पर हुआ था ॥३२॥ मैं वरद हूँ—ऐसा उससे कहने पर उस कुरु ने मुझसे वरदान माँगा था—कुरु ने कहा—जितना भी यह मैंने भू भाग कर्षित किया है वह आपका धर्म क्षेत्र हो जाये ॥३३॥ यहाँ पर जो भी स्नान करने वाले हों अथवा मृत्युगत हों उनके लिये यह स्थल महान् पुण्य फल देने वाला हो जावे । हे माधव ! यहाँ पर उपवास, दान, स्नान, जाप और होम यज्ञादिक तथा हे विभो ! अन्य भी शुभ कर्म अथवा अशुभ कर्म भी आपके प्रसाद से अक्षय एवं महान् फल वाला हो जावे । यही इस प्रवर क्षेत्र का

प्रभाव होवे । आप तो विषयेन्द्रियों के स्वामी और साक्षात् शंख, चक्र और गदा के धारण करने वाले प्रभु हैं । इसी भाँति मैं यह भी वरदान आप से चाहता हूँ कि आप हे अच्युत ! हे पुण्डरीकाक्ष ! समस्त देवों तथा देव शूली के साथ यहीं पर निवास करें और यह स्थल मेरे नामका व्यञ्जक होवे । इतना उसके कहने पर मैंने उससे 'तथास्तु'—सब ऐसा ही होगा—यह उससे मैंने कहा था ।।३४-३७।।

तथा च त्वं दिव्यवपुर्भव भूयो महीपते ।
तथान्तकाले मय्येव लयमेष्यसि सुव्रत ।।३८
शाश्वती तव कीर्तिश्च भविष्यति न संशयः ।
तत्र वै याजको यज्ञान्यजिष्यसि सहस्रशः ।।३९
तस्य क्षेत्रस्य रक्षार्थं ददौ स पुरुषोत्तमः ।
यक्षं च चन्द्रनामानं वासुकिं चापि पन्नगम् ।।४०
विद्याधरं शङ्कुकर्णं सुकेशं राक्षसेश्वरम् ।
अजावनं च नृपतिं मदादेवं च पावकम् ।।४१
एतानि सर्वतोऽभ्येत्य रक्षन्ति कुरुजाङ्गलम् ।
अमीषां बलिनोऽन्ये च भृत्याश्चैवानुयायिनः ।।४२
अष्टौ सहस्राणि धनुर्द्धराणां निवारयन्तीह सुदुष्कृतान्वै ।
स्नातुं न यच्छन्तिमहोग्ररूपास्त्वन्यस्य ते वीरचराचराणाम् ।।

फिर मैंने उससे कहा था—हे महीपते ! आप अब दिव्य वपु वाले हो जावें तथा अन्तकाल में आप हे सुव्रत ! मुझमें ही लय को प्राप्त होंगे ।।३८।! आपकी कीर्त्ति शाश्वती होगी—इसमें कुछ भी संशय नहीं होगा । वहाँ पर याजक सहस्रों यज्ञों का यजन करेगा ।।३९।। पुलस्त्य महर्षि ने कहा—-उन भगवान् पुरुषोत्तम प्रभु ने फिर उस क्षेत्र की रक्षा के लिये चन्द्र नाम वाले यक्ष को तथा वासुकि सर्प को प्रदान किया था ।।४०।। विद्याधर, शंकुकर्ण, सुकेश, राक्षसेश्वर, अजावन, नृपति, महादेव पावक, इन सबको प्रदान किया था और ये सभी वहाँ पर एकत्रित होकर सभी ओर से उस कुरु जाँगलकी रक्षा करते हैं । इनके अन्य बलशाली भृत्य तथा अनुयायी गण आठ सहस्र धनुर्धारी यहाँ पर दुष्कृतों

का निवारण किया करते हैं । वे महान् उग्ररूप वाले चराचरों में अन्य किसी को स्नान नहीं करने देते थे ॥४१-४३॥

तस्यैव मध्ये बहुपुण्य युक्तं पृथूदकं पापहरं शिवं च ।
पुण्यानदीप्राङ्मुखताप्रयाताजलौघयुक्तस्य सुताजलाढ्या ॥४४
पूर्वं नदीयं प्रपिता महेन सृष्टा समं भूतगणैः समस्तैः ।
मही जलं वह्निसमीरमेव खं त्वेवमादौविबभौ पृथूदकम् ॥४५
सर्वे तथाऽतोयधयो महान्तस्तीर्थानि नद्यः स्रवणाः स रांसि ।
संनिर्मितानीह महाभुजेन सदेवमार्गः सलिलं हि तेषु ॥४६
सरस्वतीदृषद्वत्योरन्तरे कुरुजाङ्गले ।
मुनिप्रवरमासीन पुराणं लोमहर्षणम् ।
अपृच्छन्त द्विजवराः प्रभवं सुरसत्तमाः ॥४७
प्रमाणं सरसो ब्रूहि तीर्थानां च विशेषतः ।
देवतानां च माहात्म्यमुत्पत्तिं वामनस्य च ॥४८
एतच्छ्रुत्वा वचस्तेषां तान्द्विजाँल्लोमहर्षणः ।
प्रणिपत्य पुराणर्षिमिदं वचनमब्रवीत् ॥४९

उसी स्थल के मध्य में एक परम पुण्य वाली महा नदी जलौघयुक्त की सुता जल से परिपूर्ण पूर्व की ओर मुख वाली प्रयाण करती थी जिसका जल बहुत अधिक था तथा पुण्यमय—पापों के हरण करने वाला एवं शिव था ॥४४॥ पहिले इस नदी का सृजन प्रपितामह ने ही किया था और समस्त भूतगणों के साथ मही, जल, अग्नि, वायु तथा आकाश ही आदि में यह अधिक जल वाली शोभित हुई थी ॥४५॥ तथा सभी महान् तीर्थ, नदियां, स्रवण और सरोवर बिना जल वाले थे और ऐसे ही निर्मित किये गये थे । महाभुज ने उनमें देवमार्ग के साथ जल दिया था ॥४६॥ सरस्वती और दृषद्वती के मध्य भाग में कुरुजाङ्गल में आसीन मुनियों में परम प्रवर पुराण लोम हर्षण से सुर सत्तम द्विज वरों ने प्रभव पूछा था ॥४७॥ ऋषियों ने कहा—इस सरोवर का प्रमाण बतलाइये और विशेष रूप से समस्त तीर्थों के विषय में भी वर्णन कीजिए । देवगणों का तथा वामन का माहात्म्य एवं उत्पत्ति के विषय

में वर्णन कीजिएगा ।।४८।। यह वचन उन सबका श्रवण करके लोम हर्षण ने उन सब का प्रणिपात किया था और उस पुराण ऋषि ने उन सबसे यह वचन कहा था ।।४६।।

ब्रह्माणमीशं कमलासनस्थं विष्णुं च लक्ष्मीसहितं तथैव ।
रुद्रं च देव प्रणिपत्य मूध्र्ना तीर्थं वरं ब्रह्मसरः प्रवक्ष्ये ।।५०
रन्तुकादौजसचापि पावनाच्च चतुर्मुखम् ।
सरः सन्निहितं प्रोक्तं ब्रह्मणा पूर्वमेव तु ।।५१
कलिद्वापरयोर्मध्ये व्यासेन च महात्मना ।
सरः प्रमाणं यत्प्रोक्तं तच्छृण्वन्तु द्विजोत्तमाः ।।५२
विश्वेश्वराद्धस्तिपुरं तथा कन्या जरद्गवी ।
यावदोघवती प्रोक्ता तावत्संनिहितं सरः ।।५३
मया श्रुतं प्रमाणं तु कथ्यमानं तु वामनम् ।
तच्छृण्वंतु द्विजश्रेष्ठाः पुण्यं वृद्धिकर महत् ।।५४
विश्वेश्वराद्देववरात्पावनी च सरस्वती ।
सरः सन्निहितं प्रोक्तं समन्तादद्धयोजनम् ।।५५
एतदाश्रित्य देवाश्च ऋषयश्च समागताः ।
सेवन्ते मुक्तिकामार्थं स्वर्गार्थं चापरे स्थिताः ।।५६

लोम हर्षण ने कहा—ब्रह्माजी, ईश, कमलासन पर स्थित विष्णु जो लक्ष्मी के सहित विराजमान हैं, रुद्रदेव और तीर्थवर ब्रह्मसर सबको शिर के बल प्रणाम करके ही मैं बताऊँगा ।।५०।। रन्तुकादौजस और पावन करने से चतुर्मुख यह सर सन्निहित ब्रह्मा ने पहिले ही कहा था ।।५१।। कलि और द्वापर के मध्य में महात्मा श्री व्यास देव ने इस सर का जो प्रमाण बतलाया है हे द्विजोत्तम वृन्द ! उसे आप अब मुझसे श्रवण करिये ।।५२।। विश्वेश्वर से हस्तिपुर तथा कन्या जरद्गवी तक ओघ वाली बताई गई है । वहीं तक यह सरोवर भी सन्निहित है ।।५३।। मैंने इसका प्रमाण वामन के द्वारा कथ्यमान मैंने श्रवण किया है । हे द्विजश्रेष्ठो ! उसे ही आप लोग सुनिये । यह पुण्यमय और महान् वृद्धि का करने वाला है ।।५४।। देव वर विश्वेश्वर से पावनी सरस्वती है ।

उसी के सन्निहित यह सर चारों ओर अर्ध योजन के प्रमाण वाला बताया गया है। इसी का समाश्रय करने वाले ऋषिगण और देव वृन्द वहां आये हुए हैं। ये सभी मुक्ति की कामना पूर्ण करने के लिये और कुछ दूसरे स्वर्ग लोक प्राप्त करने की कामना से इसका सेवन किया करते हैं ॥५५-५६॥

ब्रह्मणा सेवितमिदं सृष्टि कामेन योगिना।
विष्णुना स्थितिकामेन हरिरूपेण सेवितम् ॥५७
रुद्रेण च सरोमध्यं प्रविष्टेन महात्मना।
सेव्य तीर्थं महातेजाः स्थाणुत्वं प्राप्तवान्हरः ॥५८
आद्यैषा ब्रह्मणो वेदिस्ततो रामह्लदः स्मृतः।
कुरुणा च यतः कृष्टं कुरुक्षेत्रं ततः स्मृतम् ॥५९
तरन्तुकारन्तुकर्योर्यदन्तरं यदन्तरं रामह्लदस्य पञ्चकात्।
एतत्कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते ॥६०

प्रजा का सृजन करने की कामना से योगीराज ब्रह्माजी ने इसका सेवन किया था। भगवान् विष्णु ने भी हरि रूप से जगत् की स्थिति (पालन-पोषण) की कामना लेकर इसका सेवन किया था। महात्मा रुद्र देव ने इस सर के मध्य में प्रवेश करके महान् तेजस्वी देव ने इस तीर्थ का सेवन किया था सो तभी से वह भगवान् हर स्थाणुत्व को प्राप्त हो गये थे ॥५७-५८॥ यह सबसे प्रथम ब्रह्मा की वेदी थी फिर इसको राम ह्लद कहा गया था जब कुरु ने इस स्थल का कर्षण किया था तो तभी से इसको कुरुक्षेत्र—इस नाम से कहा जाता है। तरन्तु कारन्तुक का जो अन्तर है और पञ्जक से राम-ह्लद का जो अन्तर है यह समन्त पञ्चक कुरुक्षेत्र पितामह की उत्तर वेदी कही जाती है ॥५९-६०॥

२३—दैत्यराज बलि-वंश वर्णन

ब्रूहि वामन माहात्म्यमुत्पत्तिं च विशेषतः।
यथा बलिर्नियमितो दत्तं राज्यं शतक्रतोः ॥१

श्रृण्वन्तु मुनयः प्रीता वामनस्य महात्मनः ।
उत्पत्तिं च प्रभावं च निवासं कुरुजाङ्गले ॥२
तथैव वंशं दैत्यानां श्रृण्वन्तु द्विज सत्तमाः ।
यस्मिन्वंशे समभवद्बलिर्वैरोचनिः पुरा ॥३
दैत्यानामादिपुरुषो हिरण्यकशिपुर्भवत् ।
तस्य पुत्रो महातेजाः प्रह्लादो नाम दानवः ॥४
तस्माद्विरोचनो जज्ञे बलिर्जज्ञे विरोचनात् ।
हते हिरण्यकशिपौ देवानुत्साद्य सर्वतः ॥५
राज्यं कृतं च तेनेष्टं त्रैलोक्ये सचराचरे ।
कृतयज्ञेषु दैत्येषु त्रैलोक्ये दैत्यतां गते ॥६
जये तथा बलवतोर्मयशम्बरयोस्तथा ।
शुद्धासु दिक्षु सर्वासु प्रवृत्ते धर्मकर्मणि ॥७

ऋषिगण ने कहा—हे भगवन् ! अब आप वामन देव की उत्पत्ति तथा उनका पूर्ण माहात्म्य हमारे सामने वर्णन कीजिए । इसको विशेष रूप से बतलाइये । जिस प्रकार से बलि राजा का वामन प्रभु ने निपमन किया था और जिस प्रकार से उसका सम्पूर्ण राज्यैश्वर्य इन्द्र को दे दिया था ॥१॥ लोम हर्षण ने कहा—हे मुनिगण ! आप सब परम प्रसन्न होकर महान् आत्मा वाले वामन प्रभु का प्रभाव तथा उत्पत्ति एवं कुरु-जांगल में उनका निवास सभी कुछ सानन्द श्रवण कीजिए ॥२॥ हे द्विज श्रेष्ठो ! उसी भाँति दैत्यों के वंश का भी आप लोग श्रवण करें जिस वंश में पहिले विरोचन का पुत्र बलि समुद्भूत हुआ था ॥३॥ इन दैत्यों का आदि पुरुष जो था वह हिरण्यकशिपु नाम वाला दैत्य था । उसका पुत्र महान् तेज से सुसम्पन्न दानव प्रह्लाद हुआ था ॥४॥ उससे विरोचन नाम वाला दैत्य प्रसूत हुआ था और विरोचन से बलि ने अपना जन्म ग्रहण किया था । हिरण्यकशिपु के निहत हो जाने पर सभी ओर से देवों का उत्सादन किया गया था । उसने चराचर त्रैलोक्य में अपना अभीष्ट राज्य किया था । यज्ञों के करने वाले दैत्यों के हो जाने पर यह त्रैलोक्य ही दैत्य भाव को प्राप्त हो गया था ॥५-६॥ बलवान् मयशम्बर के जप

हो जाने पर सभी दिशाओं के पूर्णतया शुद्ध हो जाने पर धर्म-कर्म के प्रवृत्त हो जाने पर सभी ओर धर्म का प्रभाव था ।।७।।

संप्रवृत्ते दैत्यपथे अयनस्थे दिवाकरे ।
प्रह्लादशम्बरमयैरनु रागेण चैव हि ।।८
दिक्षु सर्वासु गुप्तासु गगने दैत्यपालिते ।
वेदेषु मखशोभां च स्वर्गस्थां दर्शयत्सु च ।।९
प्रकृतिस्थे ततो लोके वर्त्तमाने च सत्पथे ।
अभावे सर्वपापानां धर्मभावे सदोत्थिते ।।१०
चतुष्पादे स्थिते धर्मे ह्यधर्मे पादविग्रहे ।
प्रजापालनयुक्तेषु भ्राजमानेषु राजसु ।
स्वधर्मयुक्तेषु तथा सर्वेष्वाश्रमवासिषु ।।११
अभिषिक्तोऽसुरैः सर्वैर्दैत्यराज्ये बलिस्तदा ।
हृष्टेष्वसुरसंघेषु नदत्सु मुदितेषु च ।।१२
अथाभ्युपगता लक्ष्मीर्बलिं पद्मान्तरप्रभा ।
पद्मोद्यतकरा देवी वरदा सुप्रवेशिनी ।।१३

सभी दिशाओं के सुरक्षित हो जाने पर दैत्यों के द्वारा गगन के भी पालित होने पर वेदों में मखों की शोभा स्वर्ग में स्थित दिखाते हुए स्थित होने पर फिर सम्पूर्ण लोक के सत्पथ पर वर्त्तमान हो जाने पर सभी पापों का अभाव हो गया था और धर्म का भाव सर्वदा उत्थित रहता था धर्म के चतुष्पाद स्थित रहने पर और अधर्म के एक पाद मात्र विग्रह वाले रहने पर सभी राजा लोग अपनी प्रजा के पालन में युक्त थे और सर्वत्र भ्राजमान हो रहे थे । सभी आश्रमों में रहने वाले लोग भी अपने २ धर्मों तथा कर्मों में युक्त हो रहे थे । ऐसे अवसर में समस्त असुरों ने दैत्यों के राज्यसिंहासन पर राजा बलि का अभिषेक किया था । उस समय में सभी दैत्यगण परम प्रसन्न-अत्यन्त सुखी और आनन्द में मग्न हो रहे थे ।।११-१२।। इसके अनन्तर पद्मान्तर प्रभावाली लक्ष्मी पद्मों के उद्योत रूपी करों वाली वरदा सुन्दर प्रवेश करने वाली देवी लक्ष्मी राजा बलि के समीप में अभ्युपगत हुई थी ।।१३।।

बले बलवतां श्रेष्ठ दैत्यराज महाद्युते ।
प्रीताऽस्मि तव भद्रं ते देवराजपराजये ॥१४
यत्त्वया युधि विक्रम्य देवराजः पराजितः ।
दृष्ट्वा ते परमं सत्त्वं ततोऽहं स्वयमागता ॥१५
नाश्चर्यं दानवव्याघ्र हिरण्यकशिपोः कुले ।
प्रसूतस्यासुरेन्द्रस्य तत्र कर्मेदमीदृशम् ॥१६
विशेषितस्त्वया राजन्दैत्येन्द्रः प्रपितामहः ।
येन युक्तं हि निखिलं त्रैलोक्यमिदमव्ययम् ॥१७
एवमुक्त्वा तु सा देवी लक्ष्मीर्दैत्यनृपं बलिम् ।
प्रविष्टा वरदा सेव्या सर्वदेवमनोरमा ॥१८
तुष्टाश्च देव्यः प्रवरा ह्रीः कीर्तिर्द्युतिरेव च ।
प्रभा धृतिः क्षमा शक्तिर्ऋद्धिर्दिव्या महामतिः ॥१९
श्रुतिर्विद्या स्मृतिः कीर्तिः शान्तिः पुष्टि स्तथा क्रिया ।
सर्वाश्चाप्सरसो दिव्या नृत्तगीतविशारदाः ॥२०
प्रपद्यन्ते तु दैत्येन्द्रं त्रैलोक्यं सचराचरम् ।
प्राप्तमैश्वर्यमतुलं बलिना ब्रह्मवादिना ॥२१

श्री देवी ने राजा बलि से आकर कहा--हे राजा बलि ! आप तो बलवान परम श्रेष्ठ हैं । हे दैत्यों के नृपति ! आपकी द्युति में तो महान् है । मैं आपसे इस समय परम प्रसन्न हूँ । अब आपका कल्याण ही होगा तथा देवराज इन्द्र को आप पराजित्त कर देंगे ॥१४॥ जो तुमने अपने परमातिशय विक्रम से युद्ध में देवराज को पराजित किया है उसी आपके परम सत्त्व को देखकर मैं स्वयं तुम्हारे पास आई हूँ ॥१५॥ हे दानवों में व्याघ्र के सदृश पराक्रम वाले ! हिरण्यकशिपु के कुल में यह कोई आश्चर्य की बात नहीं है । आप भी उसी असुरेन्द्र के कुल में समुत्पन्न हुए हैं आपका ऐसा ही कर्म होना ही चाहिए ॥६॥ हे राजन् ! दैत्यों के स्वामी प्रपितामह को आपने विशेषित किया है जिससे यह सम्पूर्ण त्रिभुवन अव्यय समन्वित है ॥१७॥ इस प्रकार से कहकर वह लक्ष्मी देवी दैत्य नृप में प्रविष्ट हो गई थी जो सब देवों में अतीव मनोरम हैं, वरदान

देने वाली और सेवन करने के योग्य हैं ।।१८।। श्री के प्रसन्न हो जाने पर फिर सभी देवियाँ सन्तुष्ट हो गईं थीं उनमें ह्री कीर्त्ति, द्युति, प्रभा-धृति, शक्ति, ऋद्धि दिव्या, महामति, श्रुति, स्मृति, कीर्त्ति, शान्ति, पुष्टि तथा क्रिया ये प्रवरा देवियाँ थीं । सभी अप्सराऐं जो दिव्य थीं और नृत्य एवं गान की विदुषी थीं दैत्येन्द्र को प्रयत्न हो गईं थीं । ब्रह्मवादी राजा बलि ने चराचर त्रैलोक्य तथा अतुल ऐश्वर्य प्राप्त कर लिया था ।।१६-२१।।

२४--बलि की देवताओं पर विजय

देवानां ब्रूहि मे कर्म यद्वृत्तास्ते पराजिताः ।
कथं देवाधिदेवोऽसौ विष्णुर्वामनतां गतः ।।१
बलिसंस्थं च त्रैलोक्यं दृष्ट्वा देवः पुरंदरः ।
मेरुसंस्थं ययौ शक्रः स्वमातुर्निलयं शुभम् ।।२
समीपं प्राप्य मातुश्च कथयामास तां गिरम् ।
आदित्याश्चरणे सर्वे दानवेन पराजिताः ।।३
यद्येवं पुत्र युष्माभिर्न शक्यो हन्तुमाहवे ।
बलिर्विरोचनसुतः सर्वैश्चैव मरुद्गणैः ।।४
सहस्रशिरसा शक्यं केवलं हन्तुमेव हि ।
तेनैकेन सहस्राक्ष हन्तुं नान्येन शक्यते ।।५
तद्वत्पृच्छाद्य पितरं कश्यपं ब्रह्मवादिनम् ।
पराजयार्थं दैत्यस्य बलेस्तस्य महात्मनः ।।६
ततो देवाः सहसुराः संप्राप्ताः कश्यपान्तिकम् ।
त त्वापश्यंश्च मारीचं मुनिं दीप्ततपोनिधिम् ।।७

ऋषियों ने कहा--हे भगवन् ! अब आप उन देवों के कर्मों को बतलाइये जो वैसे चरित्र वाले थे कि पराजित हो गये थे ? यह भी कृपया बतलाइये कि देवों के भी आधिदेव भवगवान् विष्णु किस कारण से

बौना रूप वाले हुए थे ? ।।१।। लोम हर्षण ने कहा—पुरन्दर देव राज ने जब देखा कि यह समस्त त्रैलोक्य राजा बलि के ही अधिकार में चला गया है तो उस समय में इन्द्र देव मेरु पर्वत पर विराजमान अपनी माता के परम शुभ निवास स्थान पर पहुंचे थे ।।२।। अपनी माता के समीप में पहुंच कर इन्द्र ने यह वचन उससे कहे थे कि समस्त देवगण दानव के द्वारा पराजित कर दिये गये हैं ।।३।। अदिति ने कहा—यदि हे पुत्र ! ऐसा है तो उस दानव को आप लोग युद्ध में नहीं मार सकते हो। बलि विरोचन का पुत्र है वह समस्त मरुद्गण के साथ केवल सहस्र शिरों वाले के द्वारा ही हनन किया जा सकता है। हे सहस्राक्ष ! वही एक इसको मार सकते हैं अन्य किसी के भी द्वारा नहीं मारा जा सकता है ।।४-५।। सो अब तुम ब्रह्मवादी अपने पिता कश्यप से जाकर पूछो कि उस महात्मा दैत्यराज बलि राजा का पराजय कैसे होगा ।।६।। इसके अनन्तर समस्त देवता सुरों के साथ कश्यप ऋषि के समीप में प्राप्त हुए थे। वहाँ पर उन्होंने दीप्ततप की खान मारिच मुनि का दर्शन प्राप्त किया था ।।७।।

आद्यं देवगुरुं दिव्यं प्रदीप्तं ब्रह्मतेजसा ।
तेजसा भास्कराकारं स्थितमग्निशिखोपमम् ।।८

न्यस्तदण्डं तपोयुक्तं बद्धकृष्णाजिनाम्बरम् ।
वल्कलाजिनसंवीतं प्रदीप्तमिव तेजसा ।।९
हुताशवद्दीप्यमान माज्यगन्धपुरस्कृतम् ।
स्वाध्यायवन्तं पितरं वपुष्मन्तमिवानलम् ।।१०
ब्रह्मवादिनमत्युग्रं चराचरगुरुं प्रभुम् ।
ब्रह्मणा प्रतिमं लक्ष्म्या कश्यप दीप्ततेजसम् ।।११
यः स्रष्टा सर्वलोकानां प्रजानां पतिरुत्तमः ।
आत्मभावविशेषेण तृतीयोऽयं प्रजापतिः ।।१२
अथ प्रणम्य ते देवाः सहादित्याः सुरर्षभाः ।
ऊचुः प्राञ्जलयः सर्वे ब्रह्मण्याः शिवमानसाः ।।१३

अजेयो युधिशक्रेण बलिर्दैत्यो बलाधिकः ।
तस्माद्विधत्त नः श्रेयो देवानां पुष्टिवर्धनम् ।
श्रुत्वा तु वचनं तेषां पुत्राणां कश्यपः प्रभुः ॥१४

कश्यप महर्षि समस्त देवों के गुरु-परम दिव्य स्वरूप ब्रह्म तेज से प्रदीप्त-तेज से सूर्य्य के समान-अग्नि की शिखा के सदृश संस्थित थे ॥८॥ न्यस्तदण्ड वाले-तपश्चर्या से समन्वित-कृष्ण मृगचर्म के वस्त्र को बाँधे हुए-वल्कल एवं अजिन से संवीत और तेज से प्रकृष्ट दीप्ति वाले थे ॥९॥ अग्नि के तुल्य दीप्यमान-आज्य (घृत) की गन्ध से पुरस्कृत ऐसे स्वाध्याय करने वाले अनल के समान देह को धारण करने वाले अपने पिताजी को जोकि ब्रह्म वादी तथा चराचर के गुरु और प्रभु थे एवं ब्रह्मा के सदृश प्रतिमा वाले लक्ष्मी से युक्त—दीप्त तेज वाले एवं अतीव उग्र थे, प्राप्त किया था ॥१०-११॥ जो समस्त लोकों के सृजन करने वाले उत्तम प्रजाओं के पति थे और आत्मभाव की विशेषता से यह तीसरे प्रजापति ही थे ॥१२॥ इसके अनन्तर उन सब देवों ने सुरर्षभ आदित्यादि के साथ उनको प्रमाण किया था। फिर मन में शिव के ध्यान वाले ब्रह्मण्य सब ने हाथ जोड़कर उनसे कहा ॥१३॥ देवों ने कश्यप जी से कहा था कि बल में परभाधिक दैत्यराज वलि युद्ध में इन्द्र के द्वारा अजेय हो रहा है। इसलिये देवगण की पुष्टिक बढ़ाने वाला कोई श्रेय आप ही करिये। उन देवगण के इस वचन का श्रवण कर जोकि सभी उनके अपने ही पुत्र थे महर्षि प्रभु कश्यप जी बोले ॥१४॥

कुरुध्वं गमने बुद्धि ब्रह्मलोकाय लोककृत् ।
कथयिष्यत्युपायं वो यथा जेष्यथ दैत्यपम् ॥१५
शक्र गच्छाम सदनं ब्राह्मणः परमाद्भुतम् ।
यथा पराजयं सर्वे ब्रह्मणः ख्यातुमुद्यताः ॥१६
सहादित्यास्ततो देवा याताः काश्यपमाश्रमम् ।
प्रस्थिता ब्रह्मसदनं ब्रह्मर्षिगणसेवितम् ॥१७

ते मुहूर्तेन संप्राप्ता ब्रह्मलोकं सुवर्चसः ।
दिव्यः कामगमैर्यानैर्यथार्हैः सुमहाबलैः ।।१८
ब्रह्माणं प्रष्टुमिच्छन्तस्तपोराशिं तमव्ययम् ।
अध्यगच्छन्त विस्तीर्णां ब्रह्मणः परमां सभाम् ।।१९
षट्पदोद्गीतमधुरां सामगैः समुदीरिताम् ।
श्रेयस्करीममित्रघ्नीं दृष्ट्वा सजत्हृषुस्तदा ।।२०
ऋचो बह्वृचमुख्यैश्च प्रोक्ताः क्रमपदाक्षरैः ।
शुश्रुवुस्त्वमरव्याघ्रा विततेषु च कर्मसु ।।२१

कश्यप मुनीन्द्र ने कहा—अब आप सभी लोग ब्रह्म लोक में जाने की बुद्धि करो। वहाँ लोकों की रचना करने ब्रह्माजी कोई उपाय आपको बतला देंगे कि वह दैत्यराज किस प्रकार से जीता जा सकेगा ।।१५।। हे इन्द्र ! ब्रह्माजी के परम अदभुत सदन में चले जाओ और सभी लोग उनसे जिस प्रकार से सबका पराजय हुआ उसे कहने के लिये तत्पर हो जाओ ।।१६।। इसके पश्चात् आदित्यादि के साथ समस्त देवगण काश्पयाश्रम में गये थे। सबने ब्रह्माजी के निवास स्थान के लिए प्रस्थान किया था जोकि ब्रह्मर्षिगण के द्वारा निवेषित था ।।१७।। मुहूर्त्त मात्र समय में ही वे सब सुवर्चस ब्रह्मलोक को प्राप्त होगये थे और सुमहान् बल वाले-दिव्य और इच्छा से ही गमन करने वाले यानों के द्वारा वहां पहुंच गये थे ।।१८।। तपोराशि-अव्यय ब्रह्माजी से पूछने की इच्छा वाले देवगण ब्रह्माजी से पूछने की इच्छा वाले देवगण ब्रह्माजी से पूछने की इच्छा वाले देवगण ब्रह्माजी की परम विस्तार वाली सभा में प्राप्त हुए थे ।।१९।। वह ब्रह्माजी की सभा षट्पदों के गीतों से अतीव मधुर था तथा सामवेद के गानों के द्वारा समुहीरित थी एवं श्रेय की वाली-शत्रुओं के हनन करने वाली उस सभा को उस समय में देखकर सब परम प्रसन्न हुए थे ।।२०।। क्रम-पदाक्षरों के सहित ऋचाऐं बहुत ऋचों में मुख्यों के द्वारा कही गयी थी तथा अमर व्याघ्रों ने उनका वितत कर्मों में श्रवण किया था ।।२१।।

यज्ञविद्यावेदविदः पदक्रमविदस्तथा ।
स्वरेण परमर्षीणां सा बभूव प्रणादिता ॥२२
यज्ञसंस्तवविद्भिश्च शिक्षाविद्भिस्तथा द्विजैः ।
छन्दसां च तथा विज्ञैः सर्वविद्याविशारदैः ॥२३
लोकायतिकमुख्यैश्च शुश्रुवुः स्वरमीरितम् ।
तत्र तत्र च विप्रेन्द्रान्नियतान्संशितव्रतान् ॥२४
जपहोमपरान्मुख्यान्ददृशुः कश्यपात्मजाः ।
तस्यां सभायामास्ते स ब्रह्मा लोकपितामहः ॥२५
चराचरगुरुः श्रीमान्विद्यया वेदमायया ।
उपासते यं तत्रैव प्रजानां पतयो विभुम् ॥२६
दक्षः प्रचेताः पुलहो मरीचिश्च द्विजोत्तमाः ।
भृगुरत्रिर्वसिष्ठश्च गौतमो नारदस्तथा ॥२७
विद्यास्तथान्तरिक्षं च वायुस्तेजो जलं मही ।
शब्दः स्पर्शश्च रूपं च रसो गन्धस्तथैव च ॥२८

यज्ञविद्या वेद के वेत्ता तथा पद, क्रम, ;धन जप्य और वजप्य आदि के ज्ञाता परमर्षियों के द्वारा स्वर से वह वेद ध्वनि प्रणादित हुई थी ॥२२॥ यज्ञों के संस्तवन के ज्ञाता तथा शिक्षा के वेत्ता एवं छन्दों के मनीषी और समस्त शास्त्रों के विशारद द्विजों के द्वारा एवं लोकायतिक प्रमुखों के द्वारा वह ईरित स्वर श्रुत हुआ था । वहाँ पर कश्यप के पुत्र देवों ने संशित व्रतों वाले—नियत-जप एवं होम में तत्पर मुख्य विप्रेन्द्रों का दर्शन किया था ॥२३-२४॥ उस सभा में लोकों के पितामह ब्रह्माजी विराजमान थे ॥२५॥ वह चराचर के गुरु श्रीमान् ब्रह्मा तथा प्रजाओं के पतिगण वेद माया विद्या के द्वारा वहाँ पर ही विभु की उपासना कर रहे थे ॥२६॥ वहाँ पर दक्ष-प्रचेता-प्रलह-मरीचि-भृगु-अत्रि-वसिष्ठ-गौतम-नारद ये सभी स्वयम्भू की उपासना कर रहे थे ॥२७॥ विद्या-अन्तरिक्ष-वायु-तेज-जल–मही-शब्द, स्पर्श-रूप-रस और गन्ध भी उपासना में व्यस्त थे ॥२८॥

प्रकृतिश्च विकाराश्च यच्चान्यत्कारणं महत् ।
साङ्गोपाङ्गाश्च चत्वारो वेदा लोकपतिस्तथा ॥२९
तपांसि क्रतवश्चैव संकल्पः प्राण एव च ।
एते चान्ये च बहवः स्वयंभुवमुपासते ॥३०
धर्मो ह्यर्थश्च कामश्च क्रोधो हर्षश्च नित्यशः ।
शुक्रो बृहस्पतिश्चैव संवर्त्तोऽथबुधस्तथा ॥३१
शनैश्चरश्च राहुश्च ग्रहाः सर्वे व्यवस्थिताः ।
मरुतो विश्वकर्मा च वसवश्च द्विजोत्तमाः ॥३२
दिवाकरश्च सोमश्च दिनं रात्रिस्तथैव च ।
आर्द्ध मासाश्च मासाश्च ऋतवः षट् च संस्थिताः ॥३३
तां प्रविश्य सभां दिव्यां ब्रह्मणः सर्वकामदाम् ।
कश्यपस्त्रिदशेशश्च पुत्रो धर्मभृतां वरः ॥३४

प्रकृति और उसके विकार तथा अन्य कारण महत्–साङ्गोपांग चारों वेद तथा लोक पति-तप-ऋतु-संकल्प और प्राण बहुत से स्वयम्भू प्रभू की उपासना में लीन थे । धर्म, अर्थ, काम, क्रोध-हर्ष शुक्र, गुरु, संवर्त्त-बुध-शनैश्चर-राहु प्रभृति सभी ग्रह वहाँ पर व्यवस्थित थे । मरुत, विश्वकर्मा,वसुगण, दिवाकर, सोम, दिन, रात्रि, अर्धमास, मास, ऋतुगण छै ये सभी वहाँ पर संस्थित थे ॥२९-३३॥ ऐसी उस दिव्य ब्रह्मा की सभा में जो समस्त कामनाओं की पूर्ण करने वाली थी देवों ने प्रवेश किया था उनमें कश्यप त्रिदशेश और धर्म भृतों के श्रेष्ठ पुत्र भी थे ॥३४॥

सर्वतेजोमयी दिव्यां ब्रह्मर्षिगणसेविताम् ।
ब्राह्मया श्रिया सेव्यमानामचिन्त्यां विगतक्लमाम् ॥३५
ब्रह्माणं प्रेक्ष्य ते सर्वे परमासनमास्थितम् ।
शिरोभिः प्रणता देवं देवा ब्रह्मर्षिभिः सह ॥३६
ततः संस्पृश्य चरणौ नियताः परमात्मनः ।
विमुक्ताः सर्वपापेभ्यः सर्वे विगतकल्मषाः ॥३७

दृष्ट्वा तु तान्सुरान्सर्वान्कश्यपेन सहागतान् ।
आह ब्रह्मा महातेजा देवानां प्रभुरीश्वरः ॥३८

वह ब्रह्माजी की सभा सम्पूर्ण तेज परिपूर्ण तेज से परिपूर्ण-परम दिव्य तथा ब्रह्मर्षिगण के द्वारा सेवित थी। वह ब्राह्मी श्री के द्वारा सेव्यमान और अचिन्तनीय एवं विगत क्लमवाली थी ॥३५॥ पद्मासन पर विराजमान लोक पितामह ब्रह्माजी का उन सबने दर्शन किया था। सबने मस्तक झुका कर ब्रह्मर्षियों के सहित देवताओं ने उनको प्रणाम किया ॥३६॥ इसके अनन्तर सबने नियत होते हुए उनके चरणों का स्पर्श किया था जो कि परमात्मा प्रभु थे। वे सभी लोग चरण स्पर्श कर सम्पूर्ण पापों से विमुक्त होकर विगत कलमष होगये थे॥३७॥कश्यप के साथ आए हुए उन सभी सुरों को देखकर महान् तेज वाले ब्रह्माजी ने जोकि देवों के प्रभु और ईश्वर थे कहा था ॥ ३८ ॥

२५—कश्यप आदि का क्षीरसागर गमन

यदर्थमिह संप्राप्ता भवन्तः सर्व एव हि ।
चिन्तयाम्यहमव्यग्रमेतदर्थं महाबलाः ॥१
भविष्यति च वः सर्वं काङ्क्षितंयत्सुरोत्तमाः ।
बलेर्दानवमुख्यस्य योऽस्य जेता भविष्यति ॥२
न केवलं सुरारीणां गतिर्मम स विश्वकृत् ।
त्रैलोक्यस्यापि नेता च देवानामपि स प्रभुः ॥३
यः प्रभुः सर्वलोकानां विश्वं यश्च सनातनम् ।
पूर्वजं यं मम प्राहुरादिदेवं सनातनम् ॥४
तं देवाश्च महात्मानं न विदुः कोऽस्त्यसाविति ।
देवानस्मांश्च विश्वं च स वेत्ति पुरुषोत्तमः ॥५
तस्यैव तु प्रसादेन प्रवक्ष्ये परमां गतिम् ।
यदि योगं समास्थाय तपश्चरति दुश्चरम् ॥६

क्षीरोदस्योत्तरे कूल उदीच्यां दिशि विश्वकृत् ।
ततः श्रोष्यथ संघुष्टाँ मेघगम्भीरनिस्वनाम् ।।७
रक्ताँ पुष्टाक्षराँ रम्यामभयां सर्वदा शिवाम् ।
वाणीं परमसंस्कारां वदतां ब्रह्मवादिनाम् ।।८

ब्रह्माजी ने कहा—आप सभी लोग जिस कार्य के लिए आये हैं हे महाबल वालो ! मैं अव्यग्र होकर इसके लिये चिन्तन करता हूँ ।।१।। हे सुरोत्तमो ! आपका अभीष्ट सम्पूर्ण तभी होगा जब कि इस दानवों में मुख्य का जीतने वाला हो जायगा ।।२।। सुरों के शत्रुओं के विषय में केवल मेरी गति नहीं है । वह इस विश्व की रचना करने वाले भगवान् त्रिलोकी के नेता हैं और देवगणों के भी वे प्रभु हैं ।।३।। वह प्रभु समस्त लोकों के हैं और जो सनातन विश्व स्वरूप हैं । मेरे भी पूर्वज जिनको आदि देव एवं सनातन कहते हैं ।।४।। और हे देवगण ! उस महान् आत्मा वाले को कोई भी नहीं ठीक २ जानता है कि यह कौन है । वह स्वयं पुरुषोत्तम प्रभु देवों को-हमको और सम्पूर्ण विश्व को को जानते हैं ।।५।। उसी के प्रसाद से मैं परमगति कह सकूंगा यदि योग में समास्थित होंकर चिरकाल पर्य्यन्त तपश्चर्या करूँ ।।६।। क्षीर-सागर के उत्तर तट पर उदीची दिशा में विश्व का स्रष्टा निवास किया करते हैं । वहाँ पर ही वह श्रवण करेंगे उस ब्रह्म वादियों की कही हुई परम संस्कार वाली वाणी को जो भली भाँति घोषित की गई है और मेघों के गम्भीर गर्जन की ध्वनि के समान है एवं रक्त, पुष्टाक्षरों वाली रम्य, भय रहित तथा सदा सर्वदा शिव स्वरूप वाली है ।।७-८।।

दिव्याँ सत्याकराँ सत्याँ सर्वकल्मषनाशिनीम् ।
सर्वदेवाधिदेवश्च ततोऽसो भवितात्मना ।।९
तद्व्रतस्य समाप्त्याँ तु योगव्रत विसर्जने ।
अमोघं तस्य देवस्य विश्वतेजो महात्मनः ।।१०
कश्यपाय वरं देवा ददामि वरदस्थिताः
स्वागतं च सुर श्रेष्ठा मत्समीपमुपागताः ।
ततोऽदितिः कश्यपश्च गृह्णीयाताँ वरं तदा ।।११

प्रणम्य शिरसा पादौ तस्मै देवाय धीमते ।
भगवानेव नः पुत्रो भवत्विति प्रसीद नः ॥ १२
उक्तश्च परया वाचा तथाऽस्त्विति स वक्ष्यति ।
देवा ब्रुवन्त ते सर्वे कश्यपोऽदितिरेव न्त्र ।:१३
तथाऽस्त्विति स च श्रोमान्वक्ष्यते सर्वलोककृत् ।
तस्माद्देवाद्गृहीत्वैवं वरं त्रिदशसत्तमाः ॥१४
कृतकृत्यास्ततः सव गच्छध्वं स्वं स्वमालयम् ।
तथाऽस्त्विति सुराः सर्वे प्रणम्य शिरसा प्रभुम् ॥१५

वह वाणी दिव्य-सत्य की आकर सत्यस्वरूपिणी और समस्त कल्मषों का नाश करने वाली है। सर्व देवों के भी अधिदेव इसके पश्चात् भावितात्मा ने उस व्रत की समाप्ति होने पर और योग व्रत के विसर्जन हो जाने पर उन महान् आत्मा वाले देव का अमोघ विश्व तेज को निसृत किया था ॥९-१०॥ भगवान् अच्युत ने कहा था—हे वरद स्थित देवगण ! मैं महर्षि कश्यप के लिये वर देता हूँ। हे सुरश्रेष्ठो ! मैं आपका स्वागत करता हूँ क्योंकि इस समय में आप लोग मेरे निवास स्थान पर उपस्थित हुए हैं। इसके अनन्तर उस वर को महर्षि अदिति के पति कश्यप एवं उनकी पत्नी ने ग्रहण किया था ॥११॥ उन परम धीमान् देवेश्वर के चरणों में सिर झुकाकर प्रणाम किया था और प्रार्थना की थी कि आप हमारे ऊपर प्रसाद करें कि आप ही स्वयं पुत्र रूप में जन्म ग्रहण करें ॥१२॥ भगवान् ने इसकी हुई अभ्यर्थना पर अपनी परम सुरम्य वाणी से कहा था 'तथास्तु' अर्थात् ऐसा ही होगा। तब वे समस्त देवगण-कश्यप मुनि तथा अदिति ने कहा था कि सब लोगों की रचना करने वाले श्रीमान् प्रभु ने 'तथास्तु' कह दिया है। फिर तो वे सभी देवगण ने भगवान् से वरदान प्राप्त कर लिया था भगवान् ने उनसे कहा था कि अब आप सब कृत कृत्य हो गये हैं सब लोग अपने २ आश्रमों को चले जावें। ऐसा ही होगा—यह कहकर सब देवताओं ने प्रभु के चरणों में मस्तक झुका कर प्रणाम किया था ॥१२-१५॥

श्वेतद्वीपं समुद्दिश्य गताः सौम्यां दिशं प्रति ।
तेऽचिरेणैव संप्राप्ताः क्षीरोदं सरितां पतिम् ।।१६
यथाऽऽदिष्टं भगवता ब्रह्मणा सत्यवादिना ।
ते क्रान्त्वा सागरान्सर्वान्पर्वतांश्च सकाननान् ।।१७
नदीश्च विविधाः पुण्याः पृथिव्यां ते सुरोत्तमा ।
अपश्यन्त तमो घोरं सर्वसत्त्वविवर्जितम् ।।१८
अभास्करममर्यादं तमसा सर्वतो वृतम् ।
अमृतं स्थानमासाद्य कश्यपेन महात्मना ।।१९
दीक्षित्वा कश्यपो दिव्यं व्रतं वर्षसहस्रकम् ।
प्रसादार्थं सुरेशाय तस्मै योगाय धीमते ।।२०
नारायणाय देवाय सहस्राक्षाय भूतये ।
ब्रह्मचर्येण मौनेन स्थानवीरासनेन च ।।२१
क्रमेण च सुराः सर्वे तपोयोगं समास्थिताः ।
कश्यपस्तत्र भगवान्प्रसादार्थं महात्मनः ।
उदीरयंश्च वेदोक्तं यमाहुः परमं स्तवम् ।।२२

फिर वे सब श्वेत द्वीप का उद्देश्य बनाकर उत्तर दिशा की ओर जो परम सौम्य थी चले गये थे । वे शीघ्र ही सरिताओं के पति क्षीरोद पर प्राप्त हो गये थे ।।१६।। जिस प्रकार से सत्यवादी भगवान् ब्रह्मा ने आदेश दिया था उन्होंने समस्त सागरों का तथा वनों के सहित सम्पूर्ण पर्वतों का क्रमण किया था ।।१७।। उन सुरेत्तमों ने पृथिवी में अनेक परम पुण्यमयी नदियों को देखा था और समस्त सत्वों से रहित अत्यधिक घोर अन्धकार को भी देखा था जो भास्कर भगवान् से रहित मर्यादा शून्य सभी ओर तम से समावृत महात्मा कश्यप ने अमृत स्थान की प्राप्ति की थी ।।१८-१९।। वहाँ पर परम धीमान् योगस्वरूप सुरेश्वर प्रभु के प्रसाद प्राप्त करने के लिये दिव्य सहस्र वर्ष के लिए व्रत की दीक्षा ली थी ।।२०।। सहस्राक्ष भूति-देव नारायण के लिये ही यह ब्रत ब्रह्मचर्य्य-मौन और स्थान पर वीरासन ग्रहण कर दीक्षा स्वीकार की थी ।।२१।। इसी प्रकार से सभी सुरवृन्द क्रम से वहाँ तपोयोग में

समास्थित हो गये थे। उस स्थान पर भगवान् कश्यप मुनीन्द्र ने महात्मा प्रभु की प्रसन्नता के लिये वेदोक्त परमोत्तम स्तव को उदीरित किया था ॥२२॥

———

२६—कश्यप कृति भगवत् स्तुति

ॐ नमो भगवते वासुदेवाय एकश्रृङ्ग वृषसिन्धो वृषाकपे सुरवृष अनादिसंभव रुद्र कपिल विष्वक्सेन सर्वभूतपते ध्रुव धर्म वैकुण्ठ वृषावर्त्त अनादिमध्यनिधन धनंजय शुचिश्रव पृश्नितेजः निजजय अमृतशय सनातन त्रिधामन् तुषित महातत्त्व लोकनाथ पद्मनाभ विरञ्चे बहुरूप अक्षय अक्षर हव्यभुक् खण्डपरशो शक्र मुञ्जकेश हंस महादक्षिण हृषीकेश सूक्ष्म महानियमधर विरजः लोकप्रतिष्ठ अरूप अग्रज धर्मज धर्मनाभ हव्यभुक् गभस्तिनाथ शतक्रतु नाथ चन्द्ररथ सूर्यतेजः समुद्रवासः अजसहस्रशिरः सहस्रपाद अयोमुख महापुरुष पुरुषोत्तम सहस्रवाहो सहस्रमूर्त्ते सहस्रास्य सहस्रसंभवविश्वं त्वामाहुः पुष्पहास चरम त्वमेव वौषट् वषट्कारं त्वामाहुरग्रयं मखेषु प्राशितारं शतधारं सहस्रधारं बभूव भूवन्द्य भूनाथ भृगुपुत्र वेदवेद्य ब्रह्मशय ब्राह्मणप्रिय त्वमेव द्यौरसि मातारिश्वाऽसि धर्मोऽसि होंता पोता हन्ता मन्ता नेता होमहेतुस्त्वमेव अग्रयश्च धाम्ना त्वमेव ऋग्भिः सुभाण्ड इज्योऽसि सुमेधोऽसि समिधस्त्वमेव पतिर्गतिर्दाता त्वमसि मोक्षोऽसि योगोऽसि सृजसि धाता परमयज्ञोऽसि सोमोऽसि दीक्षितोऽसि दक्षिणाऽसि विश्वमसिस्थविर हिरण्यगर्भ नारायण त्रिनयन आदिवर्ण आदित्यतेजः महा पुरुष पुरुषोत्तम आदिदेव भूविक्रम त्रिविक्रम प्रभाकर शंभो स्वयभूः भूतादिमहाभूतोऽसि विश्वभूत विश्वं त्वमेव विश्वगोप्ताऽसि पवित्रमसि विश्वभव ऊर्ध्वकर्मन् अमृत दिवस्पते वाचस्पते घृतार्चिः अनन्तकर्म्मवंश प्राग्वंशधीः त्वमश्वमेधः वरा-

र्थिनां वरदोऽसित्वम् । चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां तुभ्यं होत्रात्मने नमः ।।१

ओम् भगवान् वासदेव के लिये नमस्कार है । श्री कश्यप महर्षि ने कहा—हे एक श्रृङ्ग ! आपके अनेक अनन्त नाम हैं । आप वृषसिन्धु वृषाकपि-सुरवृष-अनादि सम्भव, रुद्रकपिल, निष्वक्सेन नामों वाले हैं । हे समस्त भूतों के स्वामिन् ! ध्रुव, वैकुण्ठ, वृषावर्त्त, अनादि मध्य निधन-धनञ्जय, शुचिश्च प्रश्निनतेज, विजय और अमृतशय ये सब आपके ही नाम हैं । हे सनातन ! त्रिधामन् ! तुबित, महातत्त्व, लोकनाथ, पद्म नाभ, विरञ्चि, वहुरूप, अक्षय, अक्षर, हव्यमुत्त खण्ड परशु, चक्र, मुज्जकेश, हंस, महादक्षिण, हृषीकेश, सूक्ष्म, महानियमधर, विरज-लोक प्रतिष्ठ, अरूप, अग्रज, धर्मज, धर्मनाभ, गभस्तिनाथ-शत ऋतुनाथ, चन्द्रस्थ, सूर्यतेज आप ही हैं । समुद्र में वास करने वाले. अज सहस्रशिर, सहस्त पाद, अयोमुख, महा पुरुष पुरुषोत्तम, सबस्रबाहु, सहस्रमूर्त्ति, सहस्तास्य और सहस्र विश्व सम्भव आप ही को कहते हैं । पुष्प हास और चरम आप ही हैं । वौषट्, वषट्कार आप ही को कहते हैं । मखों में अग्न्य, प्राशिता, शतधार, सहस्रधार आप ही हुए थे । भूपर वन्दना करने के योग्य, भू के नाथ, भृगु के पुत्र, वेदों के द्वारा जानने के योग्य, ब्रह्मशय, बाह्मणों को प्रिय आप ही हैं । आप ही द्यौ हैं-मातरिम्वा हैं-आप ही धर्म्म हैं-होता, पोता, दृन्ता, मन्ता, नेता और होम के हेतु भी आप ही हैं। धाम अर्थात् तेज में सर्वाग्रणी आप ही हैं—ऋचाओं के द्वारा यजन करने के योग्य-सुभाण्ड आप हैं । सुन्दर मेधा वाले और समिध भी आप ही हैं । सब के पति, सब की गति अर्थात् उद्धारक, सबको देने वाले भी आप ही हैं । आप ही मोक्ष स्वरूप हैं योग के स्वरूप में भी आप ही रहते हैं । आप ही रहते हैं । आप ही सृजन किया करते हैं तथा धाताभी आप ही हैं । परमोत्कृष्ट यज्ञ के रूप में भी आप रहते हैं—आप ही सोम हैं—दीक्षित हैं—दीक्षित हैं-दक्षिणा भी आपका ही स्वरूप है । आप ही विश्व हैं तथा स्थविर हिरण्य गर्भ नारायण एवं त्रिनयन शंकर भी आप ही हैं । आदि वर्ण-आदित्य का

तेज, महापुरुष, पुरुषों में उत्तम-आदिदेव, भूविक्रम, त्रिविक्रम, प्रभाकर, शम्भु, स्वयम्भू और भूतादि महाभूत भी आप ही हैं, विश्वभूत तथा यह विश्व भी आप ही हैं। हे भगवन् ! आप इस विश्व की रक्षा करने वाले हैं। आप सब में पवित्र रूप वाले हैं। विश्वम्भर, ऊर्ध्व कर्म्मा, अमृत, दिवस्पति, वाचस्पति, घृतार्चि, अनन्त कर्म्मवंश, प्राग्वंश भी आप ही हैं। अश्वमेध और वरों के चाहने वालों को वरदान देने वाले आप ही हैं। चारों-चारों से दो से और पाँचों से तथा फिर दोनों से आपके लिए हनन किया जाता है ऐसे होत्रात्मा आपके लिये बारम्बार नमस्कार है ॥१॥

२७--अदिति कृत भगवत् स्तुति

नारायणस्तु भगवाञ्छ्रुत्वैवं परमं स्तवम् ।
ब्रह्मजेन द्विजेन्द्रेण कश्यपेन समीरितम् ॥१
उवाच वचनं सम्यक्तुष्टः पुष्टपदाक्षरम् ।
श्रीमान्प्रीतमना देवो यद्वदेत्प्रभुरीश्वरः ॥२
वरं वृणुध्वं भद्रं वो वरदोऽस्मि सुरोत्तमाः
सुप्रीतोऽसि सुरश्रेष्ठ सर्वेषामेथ निश्चयात् ॥३
वासवस्यानुजो भ्राता ज्ञातीनां नन्दवर्द्धनः ।
आदित्या अपि च श्रीमान्भगवानस्तु वै सुतः ॥४
अदितिर्देवमाता च एत मेवार्थमुत्तमम् ।
पुत्रार्थं वरदं प्राह भगवन्तं वरार्थिनी ॥५
निःश्रेयसाथ सर्वेषां देवतानां महेश्वरः ।
त्राता भर्ता च दाता च शरणं भवनः सदा ॥६

महामुनीन्द्र लोम हर्षण जी ने कहा—भगवान् नारायण ने इस प्रकार से कश्यप महर्षि के द्वारा किये गये परम स्तव का श्रवण किया था जोकि ब्रह्मा के श्रेष्ठ पुत्र तथा द्विजगण में अत्युत्तम कश्यप के द्वारा मुख से समुच्चारित किया गया था ॥१॥ इस स्तुति से अतीव सन्तुष्ट

होकर परम पुष्ट पद एवं अक्षरों वाले वचन श्रीमान् प्रीति वाले देव प्रभू एवं ईश्वर ने कहे थे। आप कोई भी वरदान माँगलो, आपका कल्याण होगा। हे सुरोत्तमो ! मैं अब आप लोगों को वरदान देता हूं। कश्यप जी ने कहा—हे सुर श्रेष्ठ ! मैं आप सब लोगों के ही निश्चय से अत्यन्त प्रसन्न होगया हूँ ॥२-३॥ इन्द्रदेव का छोटा भाई अपनी ज्ञाति के जनों के आनंद का वर्द्धन करने वाला है और आदित्य भी है। श्रीमान् भगवान् सुत होवें ॥४॥ देवों की माता अदिति ने इसी उत्तम अर्थ के लिए वरदान चाहने वाली होकर वर देने वाले भगवान् से पुत्र के लिए ही कहा था ॥५॥ देवगण ने कहा—महेश्वर प्रभु समस्त देवों के कल्याण के लिये त्राण करने वाले दाता और सदा हम सब के रक्षक होवें ॥६॥

ततस्तानब्रवीद्विष्णुर्देवांस्तान्स्वयमेव च।
सर्वेषामेव युष्माकं ये भविष्यन्ति शत्रवः।
मुहूर्तमपि ते सर्वे न स्थास्यन्ति ममाग्रतः ॥७
हत्वाऽसुरगणान्सर्वान्यत्रभागाग्र भोजिनः।
हव्यादांश्च सुरान्सर्वान्कव्यादांश्च पितृनपि ॥८
करिष्ये विबुधश्रेष्ठाः पारमेष्ठ्येन कर्मणा।
यथायातेन मार्गेण निवर्तध्वं सुरोत्तमाः ॥९
एवमुक्ते तु देवेन विष्णुना प्रभविष्णुना।
ततः प्रहृष्टमनसः पूजयन्ति स्म तं प्रभुम् ॥१०
विश्वे देवा महात्मानः कश्यपोऽदितिरेव च।
नमस्कृत्य सुरेशाय तस्मै देवाय रंहसा ॥११
प्रयाताः प्राग्दिशं सर्वे विपुलं कश्यपाश्रमम्।
ते कश्यपाश्रमं गत्वा कुरुक्षेत्रवनं महत् ॥१२
संप्रसाद्यादितिं तत्र तपसे तां न्ययोजयन्।
सा चचार तपो घोरं वर्षाणामयुतं तदा ॥१३
तस्या नाम्ना वनं दिव्यं सर्वकामप्रदं शुभम्।
आराधनाय कृष्णस्य वाग्यता वायुभोजना ॥१४

महर्षि लोमहर्षण ने कहा—इसके अनन्तर भगवान् विष्णु ने स्वयं ही उन सब देवों से कहा था कि आप सब लोगों के जो भी कोई शत्रु होंगे वे सब मेरे आगे एक मुहूर्त्त भर भी स्थित न होंगे ।।७।। समस्त असुरों को, जो इस समय में यज्ञ के भागों के अग्रभोजी बन रहे हैं, मार कर सब सुरों को हव्य ग्रहण करने वाले और सब पितरों को कव्य-भोजी कर दूंगा,हे विबुधों में श्रेष्ठो ! आप सुरों में उत्तम जो हैं वे सभी पारमेष्ठय् कर्म्म के द्वारा यातायात मार्ग से निवृत्त हो जाओ अर्थात् वापिस चले जाओ ।।८-९।। इस प्रकार से प्रभविष्णु भगवान् विष्णु के द्वारा कहने पर सब देवता परम प्रसन्न मन वाले होकर उन प्रभु का पूजन करने लगे थे ।।१०।। विश्वेदेवा जो महान् आत्मा वाले थे, महर्षि कश्यप और अदिति सब ने सुरों के स्वामी उस देव के लिये प्रणाम किया था और फिर सब विस्तृत कश्यपाश्रम को प्राग्दिशा में प्रयाण कर गये थे । वे कश्यप के आश्रम में पहुँच कर महान् कुरुक्षेत्र वन में गये थे ।।११-१२।। वहाँ अदिति देवी को भली भाँति प्रसन्न कर उसको तपश्चर्या करने के लिये नियोजित किया था । उस देवी अदिति ने भी उस समय में दश हजार वर्ष व्यापी महान् घोर तप किया था ।।१३।। उसी के नाम से वह दिव्य वन सम्पूर्ण कामनाओं के प्रदान करने वाला परम शुभ हो गया था । भगवान् श्रीकृष्ण की आराधना करने के लिये पूर्ण मौनवती और केवल वायु का ही भोजन करने वाली होकर तपस्या कर रही थीं ।।१४।।

दैत्यैर्निराकृतान्दृष्ट्वा सभयानृषिसत्तमान् ।
वृथापुत्राऽहमिति सा निर्वेदात्प्रणता हरिम् ।
तुष्टाव वाग्भिरिष्टाभिः स्तुतिभिः सा तपोधना ।।१५
शरण्यं शरणं विष्णुं प्रणता भक्तवत्सलम् ।
देवदैत्यमयं चादिमध्यमान्तस्वरूपिणम् ।।१६
नमः कृत्यार्तिनाशाय नमः पुष्करमालिने ।
नमः परमकल्याण कल्याणायादिवेधसे ।।१७

नम पङ्कजनेत्राय नमः पङ्कजनाभये ।
नमः पङ्कजसंभूतिसंभवायात्मयोनये ॥१८
श्रियः कान्ताय दान्ताय दान्तदृश्याय चक्रिणे ।
नमः पद्मादिहस्ताय नमः कनक वाससे ॥१९
तथाऽत्मज्ञानयज्ञाय योगिचिन्त्याय योगिने ।
निर्गुणाय विशेषाय हरये ब्रह्मरूपिणे ॥२०
जगत्संतिष्ठते यत्र जगतो यो न दृश्यते ।
नमः स्थूलातिसूक्ष्माय तस्मै देवाय शार्ङ्गिणे ॥२१

दैत्यों के द्वारा निराकृत (अपमानित) और भय से संयुत ऋषि वृन्दों को देखकर वह मनमें विचार करती थीं कि मैं तो वृथा ही पुत्रों वाली हुई हूँ—ऐसा चिन्तन करते हुए ही उस देवी ने अत्यन्त निर्वेद पूर्वक हरि के चरणों में प्रणत होकर उनको अभीष्ट वाणियों से युक्त स्तुतियों के द्वारा हरि का स्तवन कर उन्हें तपोधन वाली ने तुष्ट किया था ॥१५॥ जो भगवान् विष्णु शरण्य और शरण अर्थात् शरणागतों की रक्षा करने वाले थे तथा जो देव एवं दैत्यों से परिपूर्ण तथा भक्त वत्सल थे उनकी ही उसने प्रणत होकर प्रार्थना की थी जिसका स्वरूप ही आदि-मध्य तथा अन्त वाला था ॥१६॥ अदिति ने कहा—हे भगवन् ! आप कृत्यार्त्ति के नाश करने वाले हैं और पुष्कर माला धारी हैं ऐसे आपको मेरा नमस्कार है। आपको मेरा नमस्कार है। आप परम कल्याण करने वाले और प्राणियों के कल्याण करने के लिए आदि वेधा हैं ऐसे आपको मेरा प्रणाम है ॥१७॥ पंकज के तुल्य नेत्रों वाले तथा नाभि में पंकज प्रसूत करने वाले आपकी सेवा में मेरा नमस्कार है । पंकज से उत्पन्न आत्मयोनि आप को प्रणाम है ॥१८॥ श्री के कान्त परमदान्त, दान्तदृश्य, सुदर्शन, चक्रधारी, पद्म प्रभृति आयुधधारी और कनक अर्थात् पीत वस्त्रधारी आपकी सेवा में मेरा प्रणाम है ॥१९॥ आत्मज्ञान के लिये यज्ञ रूपी-योगियों के द्वारा चिन्तन के योग्य-परमयोगी गुणों से रहित-विशेष स्वरूप वाले, ब्रह्मरूपी हरि के लिये नमस्कार है ॥२०॥ जिसमें सम्पूर्ण जगत् सस्थित रहता है और जो जगत् को

दिखलाई नहीं देते हैं, ऐसे स्थूल और अत्यन्त सूक्ष्म शार्ङ्ग धनुष के धारण करने वाले देव के लिए मेरा नमस्कार है ॥२१॥

यं न पश्यन्ति पश्यन्तो जगदप्यखिलं नराः ।
अपश्यद्भिर्जगद्यश्च दृश्यते हृदि संस्थितः ॥२२
बहिर्ज्योतिरलक्ष्यो यो लक्ष्यते ज्योतिषः परः ।
यस्मिन्नेव यतश्चैव यस्यैतदखिलं जगत् ॥२३
तस्मै समस्तजगतां सुनाथाय नमो नमः ।
आद्यः प्रजापतिर्यस्तु पितृणां यः परः पतिः ।
पतिः सुराणां यस्तस्मै नमः कृष्णाय वेधसे ॥२४
यः प्रवृत्तैर्निवृत्तैश्च कर्मभिस्तु विरज्यते ।
स्वर्गापवर्गफलदो नमस्तस्मै गदाभृते ॥२५
यश्चिन्त्यमानो मनसा सद्यः पापं व्यपोहति ।
नमस्तस्मै विशुद्धाय परस्मै हरिमेधसे ॥२६
यं पश्यन्त्यखिलाधारमीशानमजमव्ययम् ।
न पुनर्जन्ममरणं प्राप्नुवन्ति नमामि तम् ॥२७
यो यज्ञं यज्ञपुरुष इज्यते यज्ञमास्थितः ।
तं यज्ञपुरुषं विष्णुं नमाति प्रभुमीश्वरम् ॥२८

मनुष्य सम्पूर्ण इस जगत् को देखते हुए भी जिन प्रभु को नहीं देख पाते हैं । इस जगत् को नहीं देखते हुओं के द्वारा भी जो हृदय में स्थित दिखलाई दिया करते हैं । बाहिर ज्योति से युक्त भी जो अलक्ष्य है और ज्योति से भी पर जो लक्षित होता है । जिसमें ही अन्दर स्थित तथा जिससे ही प्रसूत यह सम्पूर्ण जगत् जिसका ही है उन समस्त जगतों के नाथ एवं अति सुयोग्य स्वामी के लिए मेरा बारम्बार नमस्कार है । जो आद्य प्रजापति है और जो पितरों का परम पति है तथा सुरों का भी जो स्वामी है उन भगवान वेधा श्रीकृष्ण के लिए मेरा प्रणाम है ॥२२-२४॥ जो प्रवृत्ति वाले तथा निवृत्ति युक्त कर्मों से विरक्त है एवं स्वर्ग तथा अपवर्ग (मोक्ष) के फल प्रदान करने वाले हैं उन गदाधारी प्रभु की सेवा में मेरा बारम्बार प्रणाम निवेदित है ॥२५॥ मन के

द्वारा जिसका चिन्तन करते रहने वाला मनुष्य तुरन्त ही पापों का नाश कर दिया करता है उन परात्पर विशुद्ध स्वरूप वाले हरि भगवान् के लिये मेरा नमस्कार समर्पित है ।।२६।। जिस सम्पूर्ण चराचर के आधार ईशान एवं अविनाशी अज को देख लेते हैं वे फिर जन्म मरण नहीं प्राप्त किया करते हैं उन्हीं प्रभु को मैं प्रणाम करती हूं ।।२७।। जो यज्ञ पुरुष यज्ञों में समास्थित होकर यज्ञों के द्वारा यजन किया जाता है उन्हीं यज्ञ पुरुष, ईश्वर विष्णु को मैं प्रणाम करता हूँ ।।२८।।

गीयते सर्व वेदेषु वेदविद्भिर्विदां गतिः ।
यस्तस्मैवदवेद्याय विष्णवे जिष्णवे नमः ।।२९
यतो विश्वं समुद्भूतं यस्मिन्प्रलयमेष्यति ।
विश्वोद्भवप्रतिष्ठाय नमस्तस्मै महात्मने ।।३०
ब्रह्मादिस्तम्बपर्यन्तं व्याप्तं येन चराचरम् ।
मायाजालं समुन्नद्धं तमुपेन्द्रं नमास्यहम् ।।३१
यस्तृतीयस्वरूपस्थो बिभर्त्यखिलमीश्वरः ।
विश्वं विश्वपतिं विष्णुं तं नमामि प्रजापतिम् ।।३२
मूर्तं तमोऽसुरमयं तद्विना विनिहन्ति यः ।
रात्रिजं सूर्यरूपी च तमुपेन्द्रं नमाम्यहम् ।।३३
यस्याक्षिणी चन्द्रसूर्यौ सर्वलोके शुभाशुभम् ।
पश्यतः कर्म सततं तमुपेन्द्रं नमाम्यहम् ।।३४
यस्मिन्सर्वेश्वरे नित्यं सत्यमेतन्मयोदितम् ।
नानृतं तमजं विष्णुं नमामि प्रभुमव्ययम् ।।३५
यदेतत्सत्यमुक्तं मे भूयश्चातो जनार्द्दन ।
सत्येन तेन सकलाः पूर्यन्तां मे मनोरथाः ।।३६

जो वेदों के वेत्ता विद्वानों के द्वारा समस्त वेदों में वेत्ताओं की गति करने वाला गाये जाते हैं, उन वेदों द्वारा वेद्य-जिष्णु भगवान् विष्णु के लिये नमस्कार हैं ।।२९।। जिनसे इस विश्व की समुत्पत्ति हुई है और जिसमें ही इसका प्रलय होगा उन विश्व के उद्भव करने वाले महात्मा के लिये नमस्कार है ।।३०।। ब्रह्मा से आदि लेकर स्तम्ब

पर्यन्त जिसने इस स्थावर-जङ्गम जगत् को व्याप्त कर रक्खा है जो समुनद्ध माया जाल है उस उपेन्द्र को मेरा प्रणाम समर्पित है ॥३१॥ जोतीसरे स्वरूप में स्थित होकर अखिल जगत् का भरण करने वाला ईश्वर है उस विश्व के पति एवं प्रजापति विष्णु को मैं प्रणाम करती हूँ ॥३२॥ जो इस असुरमय तप को उसके विना ही नष्ट कर दिया करता है जोकि रात्रि में उत्पन्न होता है उस सूर्य रूपी उपेन्द्र को मैं प्रणाम करती हूं ॥३३॥ जिसके चन्द्र-सूर्य रूपी दो नेत्र सम्पूर्ण लोक में शुभ एवं अशुभ कर्म को सर्वदा देखा करते हैं उस उपेन्द्र को प्रणाम करती हूँ ॥३४॥ जिस सर्वेश्वर में नित्य ही यह सत्य मैंने बतलाया है जो अनृत रहित-अज एवं अव्यय प्रभु विष्णु हैं उनको नमस्कार है॥३५॥ मैंने जो यह पुनः सत्य वाणी कही है अतः हे जनार्दन ! उसी आपके सत्य से मेरे सम्पूर्ण मनोरथ पूर्ण हो जावें यही मेरी विनम्र प्रार्थना आपके चरणों में है ॥३६॥

२८—अदिति को वर प्रदान वर्णन

एवं स्तुतोऽथ भगवान्वासुदेव उवाचताम् ।
अदृश्यः सर्वभूतानां तस्याः संदर्शने स्थितः ॥१
मनोरथांस्त्वमदिते यानिच्छस्यभिवाञ्छितान् ।
तांस्त्वं प्राप्स्यसि धर्मज्ञे मत्प्रसादान्न संशयः ॥२
शृणु त्वं च महाभागे वरो यस्ते हृदि स्थितः ।
मद्दर्शनं हि विफलं न कदाचिद्भविष्यति ॥३
यश्चेह मद्वने स्थित्वा त्रिरात्रं वै करिष्यति ।
सर्वं कामाः समृध्यन्ते मनसा यानिहेच्छति ॥४
दूरस्थोऽपि वनं यस्तु ह्यदिते स्मरते नरः ।
सोऽपि याति परं स्थानं किं पुनर्निवसन्नरः ॥५
यश्चेह ब्राह्मणान्पञ्च त्रीन्वा द्वावेकमेव वा ।
भोजयेच्छ्रद्धया युक्तः स याति परमां गतिम् ॥६

महर्षि लोमहर्षण जी ने कहा—इस भाँति जब अदिति के द्वारा स्तुति की गई तो भगवान् वासुदेव ने उससे कहा जोकि समस्त प्राणियों को अदृश्य रहते हैं वे उसको उस समय में दर्शन प्रदान कर रहे थे ।।१।। श्रीभगवान् ने कहा—हे अदिति ! जिन अपने मन के अभीष्ट मनोरथों को तू चाहती है उन सभी मनोरथों को तू प्राप्त कर लेगी । तू तो बहुत बड़ी धर्म की ज्ञाता है । मैं प्रसन्न हूँ अब मेरे प्रसाद मे यह सभी सफल होगा—इसमें कुछ भी संशय नहीं है ।।२।। हे महा भाग्य वाली ! अब तुम श्रवण करो जो कुछ वरदान प्राप्त करना हृदय में चाहती हो । मेरा दर्शन कभी भी विफल नहीं हुआ करता है ।।३।। मेरे इस वन में जो कोई तीन रात्रि भी स्थित होकर साधना करेगा उसके सभी काम जिनको वह मन में इच्छा करेगा सफल हो जाया करेंगे ।।४।। दूर में भी स्थित कोई मनुष्य यदि अदिति की तपश्चर्या उस वन का स्मरण कर लेता है वह भी परम पद को चला जाया करता है उस वन की ऐसी महिमा है जो उसी में निवास करता है उसके लिये क्या कहा जावे ।।५।। यहाँ पर जो भी कोई पाँच-तीन-दो और एक भी ब्राह्मणों का श्रद्धा से युक्त होकर भोजन कराता है वह परम गति को प्राप्त होता है ।।६।। अदिति ने कहा—हे देवेश्वर ! यदि आप मेरी भक्ति से प्रसन्न है तो अपने भक्तों पर प्यार करने वाले प्रभो ! मैं यह चाहती हूँ कि मेरा पुत्र वासव त्रैलोक्य का अधिपति होवे ।।७।।

यदि देवः प्रसन्नस्त्वं भक्त्या मे भक्तवत्सल ।
त्रैलोक्याधिपतिः पुत्रस्तदस्तु मम वासवः ।।७

हृतं राज्यं हृतश्चास्य यज्ञभाग इहासुरैः ।
त्वयि प्रसन्ने वरद तत्प्राप्नोतु सुतोमम ।।८

हृतं राज्यं न दुःखाय मम पुत्रस्य केशव ।
प्रपन्नदायविभ्रंशः पीडां मे कुरुते हृदि ।।९

कृतः प्रसादो हि मया तव देवि यथेप्सितम् ।
स्वांशेन चैव ते गर्भे संभविष्यामि कश्यपात् ।।१०

तव गर्भसमुद्‌भूतस्ततस्ते ये सुरारयः ।
तानहं निहनिष्यामि निर्वृता भव नन्दिनि ॥११
प्रसीद देवदेवेश नमस्ते विश्वभावन ।
नाहं त्वामुदरे वोढुमीश शक्ष्यामि केशव ।
यस्मिन्प्रतिष्ठितं सर्वं विश्वयोनिस्त्वमीश्वरः ॥१२
अहं च त्वां वहिष्यामि स्वात्मानं चैव नन्दिनि ।
न च पीडां करिष्यामि स्वस्ति तेऽस्तु व्रजाम्यहम् ॥१३
इत्युक्त्वाऽन्तर्हिते देवेऽदितिर्गर्भं समादधे ॥१४

यहाँ पर असुरों ने इसके राज्य का हरण कर लिया है और यज्ञों का भाग भी इस विचारे का असुरों के द्वारा अपहृत हो गया है हे वरद ! अब आपके प्रसन्न होने पर वह उसको प्राप्त कर लेवे ॥८॥ हे केशव ! मेरे पुत्र का राज्य अपहृत हो गया है—इसका उसको दुःख नहीं है किन्तु प्रपन्न के दाय के भ्रंश हो जाने से मेरे हृदय में अत्यन्त पीड़ा होती है ॥९॥ भगवान् ने कहा–हे देवि ! मैंने अपना प्रसाद (प्रसन्नता) तुम्हारे पर कर दिया है जैसा कि तुमको अभीष्ट है । मैं अपने ही अंश से आपके गर्भ में कश्यप महर्षि से उत्पन्न होऊंगा ॥१०॥ जब मैं आपके गर्भ से समुत्पन्न हो जाऊंगा तो जो भी सुरों के शत्रु हैं उनको मैं मार गिराऊंगा । हे नन्दिनि ! अब आप निर्वृत हो जाओ ॥११॥ अदिति ने कहा—हे देवदेवेश ! आप प्रसन्न होइये । हे विश्व भावन ! आपकी सेवा में मेरा प्रणाम समर्पित है । हे केशव ! आपतो सबके ईश हैं मैं आप को अपने उदर में वहन नहीं कर सकूंगी जिन आप में सभी कुछ प्रतिष्ठित है क्योंकि आप तो सम्पूर्ण विश्व की योनि हैं और आप सबके ईश्वर हैं ॥१२॥ श्री भगवान् ने कहा—हे नन्दिनि ! मैं आपको और स्वयं आपने आत्मा को वहन करूंगा । मैं आपको कुछ भी पीड़ा नहीं करूंगा । आपका कल्याण हो, अब मैं जाता हूँ ॥१३॥ महर्षि लोमहर्षण ने कहा–इतना कह कर भगवान के अन्तर्धान हो जाने पर अदिति ने गर्भ धारण किया था ॥१४॥

गर्भस्थिते ततः कृष्णे चचाल सकला क्षितिः ।
चकम्पिरे महाशैला जग्मुः क्षोभं महाब्धयः ॥१५
यतो यतोऽदितिर्याति ददाति पदमुत्तमम् ।
ततस्ततः क्षितिः खेदान्ननाम द्विजपुङ्गवाः ॥१६
दैत्यानामपि सर्वेषां गर्भस्थे मधुसूदने ।
बभूव तेजसो हानिर्यथोक्तं परमात्मना ॥१७

भगवान् श्रीकृष्ण के गर्भ में संस्थित हो जाने पर सम्पूर्ण भूमि चलायमान हो गई थी, जो महान् शैल थे वे सब कम्पित हो गये थे और महासागर क्षोभ को प्राप्त होगये थे ॥१५॥ हे द्विज श्रेष्ठो ! जहाँ-जहाँ भी अदिति जाती थी और अपना उत्तम पद रखती थी वहाँ-वहाँ पर ही खेद से यह मही झुक जाया करती थी ॥१६॥ भगवान् मधुसूदन के गर्भ में संस्थित हो जाने पर सभी दैत्यों के तेज की हानि होगई थी अर्थात् असुरों का तेज क्षीण हो गया था जैसा कि परमात्मा ने कहा था ॥१७॥

—०*०—

२९--प्रह्लाद कृत बलि निन्दा एवं शाप

निस्तेजसोऽसुरान्दृष्ट्वा समस्तानसुरेश्वरः ।
प्रह्लादमथ पप्रच्छ बलिरात्मपितामहम् ॥१
तात निस्तेजसो दैत्या निर्दग्धा इव वह्निना ।
किमेते सहसैवाद्य ब्रह्मदण्डहताइव ॥२
दुरिष्टं किं नु दैत्यानां किं कृत्या सुरनिर्मिता ।
नाशायैषा समुद्भूता येन निस्तेजसोऽसुराः ॥३
इत्थं दैत्यवरस्तेन पृष्टः पौत्रेण ब्राह्मणाः ।
चिरं ध्यात्वा जगादैवमसुरं तं तदा बलिम् ॥४
चलन्ति गिरयो भूमिर्जहाति सहजां स्थितिम् ।
नद्यः समुद्राः क्षुभिता दैत्या निस्तेजसः कृताः ॥५

सूर्योदये यथा पूर्वं तथा गच्छन्ति न ग्रहाः ।
देवतानां परा लक्ष्मीः कारणेनानुमीयते ।।६
महदेतन्महाबाहो कारणं दानवेश्वर ।
न ह्यल्पमिति मन्तव्यं क्रिया कार्या कथंचन ।।७

महर्षि लोमहर्षण ने कहा—दैत्यराज बलि ने जब देखा था कि समस्त असुर निस्तेज हो गये हैं तब उसने अपने पितामह प्रह्लाद से इसके विषय में पूछा था ।।१।। बलि ने कहा—हे तात ! इस समय में सभी दैत्य तेज से हीन हो गये हैं मानों इन दैत्यों को अग्नि ने दग्ध कर दिया हो, सबकी ऐसी ही दशा हो गई है । क्या कारण है ? क्या ये सब सहसा ही आज ब्रह्मदण्ड से हत की तरह होगये हैं ?।।२।। यह क्या कोई दैत्यों का दुरिष्ट है या कोई कृत्या सुरों ने निर्मित की है जो कि समुत्पन्न हो गई है और नाश किया चाहती है ? जिस कारण से ये सभी दैत्य निस्तेज हो गये हैं ।।३।। महर्षि लोमहर्षण ने कहा—हे ब्राह्मण वृन्द ! उस दैत्यराज बलि ने जो कि प्रह्लाद का पौत्र था प्रह्लाद से इस तरह पूछा तो उसने चिरकाल पर्यन्त ध्यान करके उस समय असुर बलि से कहा—प्रह्लाद ने कहा—पर्वतमाला चलायमान हो गई है और यह भूमि भी अपनी स्वाभाविक स्थिति का त्याग करती है । नदियाँ तथा सागर क्षोभ युक्त हो गये हैं । समस्त दैत्य तेज से हीन कर दिये हैं ।।४-५।। सूर्योदय होने पर जिस प्रकार से पहिले जाया करते थे उस तरह अब ग्रह गमन नहीं कर रहे हैं । यह देवताओं की परालक्ष्मी के ही कारण ऐसा हो रहा है—ऐसा अनुमान किया जाता है ।।६।। हे महाबाहो ! आप तो दानवों के राजा हैं । इसका कोई साधारण नहीं बल्कि महान् ही कारण है । इसको तुम छोटा न समझना किसी प्रकार से कोई किया अवश्य ही करनी चाहिए ।।७।।

इत्युक्त्वा दानवपतिं प्रह्लादः सोऽसुरोत्तमः ।
अत्यर्थभक्तो देवेशं जगाम मनसा हरिम् ।।८
स ध्यानं प्रथमं कृत्वा प्रह्लादस्तु ततोऽसुरः ।
विचारयामास ततो यथा देवं जनार्दनम् ।।९

स ददर्शोदरे तस्याः प्रह्लादो वामनाकृतिम् ।
तदन्तश्च वसूत्रुद्रानश्विनौ मरुतस्तथा ।।१०

साध्यान्विश्वांस्तथा देवान्गन्धर्वोरगराक्षसान् ।
विरोचनं च तनयं बलिं चासुरनायकम् ।।११

जम्भं कुजम्भं नरकं बाणमन्यांस्तथाऽसुरान् ।
आत्मानं गगनं वायुं मनस्तोयं हुताशनम् ।।१२
समुद्राद्रिद्रुमद्वीपान्सरांसि च पशून्महीम् ।
वयोमनुष्यानखिलांस्तथैव च सरीसृपान् ।।१३

समस्तलोकस्रष्टारं ब्रह्माणं भवमेव च ।
ग्रहनक्षत्रताराद्यानृषींश्चैव प्रजापतिम् ।।१४

संपश्यन्विस्मयाविष्टः प्रकृतिस्थः क्षणात्पुनः ।
प्रह्लादः प्राह दैत्येन्द्रं बलिं वैरोचनं तदा ।।१५

महर्षि लोमहर्षण ने कहा—असुरों में परम श्रेष्ठ उस प्रह्लाद ने दानवों के स्वामी बलि से इस प्रकार से कहकर अत्यधिक भगवान् के भक्त उसने देवेश्वर श्री हरि का मन में ध्यान किया था ।।८।।उस असुर प्रह्लाद ने प्रथम ध्यान किया था और फिर इसके पश्चात् उसने विचार किया था तो उसने वामन के आकार वाले देव जनार्दन को अदिति के उदर में देखा था । उनके ही अन्दर उसने वसुगण-अश्विनीकुमार-मरुत-साध्य-विश्व-देववृन्द-गन्धर्व-उरग-राक्षस-विरोचन पुत्र-असुर नायक बलि-जम्भ-कुजम्भ-नरक वाण एवं अन्य असुरगण-अपने आपको-गगन-वायु-मन-तोय-और अग्नि के देखा था ।।६-१२।। समुद्र-पर्वत-द्रुम-द्वीप-सर-पशु-मही-पक्षी-समस्त मनुष्य और सरीसृपों को देखा था ।।१३।। समस्त लोकों के सृजन करने वाले-ब्रह्मा, भव,ग्रह, नक्षत्र, तारा प्रभृति—ऋषिगण, प्रजापति इन सबको वहाँ पर देखते हुए प्रह्लाद एक दम विस्मय से आविष्ट हो गये थे । कुछ क्षणों के पश्चात् प्रकृतिस्थ हुए थे । फिर प्रहलाद ने दैत्यराज विरोचन के पुत्र तथा अपने पौत्र बलि से कहा ।।१५।।

वत्स ज्ञातं मया सर्वं यदर्थं भवतामियम् ।
तेजसो हानिरुत्पन्ना तच्छृणु त्वमशेषतः ।।१६
देवदेवो जगद्योनिर्जगदादिरजः प्रभुः ।
अनादिरादिर्विश्वस्य वरेण्यो वरदो हरिः ।।१७
परावराणां परमः परापरवतां गतिः ।
प्रभुः प्रमाणं मानानां सप्तलोकगुरोर्गुरुः ।
स्थितिं कर्त्तुं जगन्नाथोह्यदित्या गर्भगः प्रभुः ।।१८
प्रभुः प्रभूणां परमः पराणामनादिमध्यो भगवाननन्तः ।
त्रैलोक्यमंशेन सनाथमेकः कर्त्तुं महात्माऽदितिजोऽवतीर्णः ।।१९
न यस्य रुद्रो न च पद्मयोनिर्नेन्द्रो न सूर्येन्दुमरीचिमिश्राः ।
जानन्ति दैत्याधिपते स्वरूपं स वासुदेवः कलयाऽवतीर्णः ।।२०
यमक्षरं वेदविदो वदन्ति विशन्ति यत्रैव विधूतपापाः ।
यस्मिन्प्रविष्टा न पुनर्भवन्ति तं वासुदेवंप्रणमामि चाद्यम् ।।२१

प्रह्लाद ने कहा था कि हे वत्स ! मैंने सभी कुछ जान लिया है जिस कारण से आप लोगों को यह तेज की हानि उत्पन्न हुई है । अब आप पूर्ण रूप से मुझसे इसका श्रवण करो ।।१६।। देवों के भी देव-इस सम्पूर्ण जगत् के कारण-जगत् के आदि स्वरूप, अजन्मा, प्रभु, अनादि, विश्व के आदि वरेण्य–वरद, हरि जो परावरों में परम है और परापर वालों की गति अर्थात् उद्धारक हैं । जो मानों के भी प्रमाण हैं तथा सातों लोकों के गुरु के भी गुरु हैं वह जगत के नाथ प्रभु स्थिति करने के लिये अदिति के गर्भगत हुए हैं ।।१७-१८।। यह प्रभुओं के भी परम प्रभु हैं तथा परों के अनादि एवं मध्य हैं । यह अन्त से रहित भगवान् हैं । यह एक ही हैं जो महात्मा इस त्रिभुवन को अपने अंश से सनाथ करने के लिये अदिति के गर्भ से जन्म ग्रहण कर अवतीर्ण हो रहे हैं ।।१९।। जिसके स्वरूप को हे दैत्यपते ! रुद्र, ब्रह्मा, इन्द्र, सूर्य, चन्द्र और मरीचि आदि महा मुनीन्द्र भी नहीं जानते हैं वही भगवान् वासुदेव साक्षात् कला से अवतीर्ण हो रहे हैं ।।२०।। जिन प्रभु को वेदों के विशारद मनीषी गण अक्षर बतलाते हैं और जिसमें ही पापों से

विमुक्त होकर प्रवेश किया करते हैं। जब उनकी चरणों की सन्निधि में पहुँच जाते हैं तो फिर जन्म भ्रमण नहीं करते हैं मैं उन प्रभु वासुदेव को आज सादर प्रणाम करता हूँ ॥२१॥

भूतान्यशेषाणि यतो भवन्ति यथोर्मयस्तोयनिधेरजस्रम् ।
लयं चयस्मिन्प्रलयेप्रयान्तितंवासुदेवप्रणतोऽस्म्यचिन्त्यम् ॥२२
रूप च चक्षुर्ग्रहणे त्वगेषा स्पर्शग्रहेऽथो रसना रसस्य ।
घ्राण च गन्धग्रहणेनियुक्तंत्वग्घ्राणचक्षूंषि न तानि यस्य ॥२३
सर्वेश्वरो वेदितव्यः स युक्त्या ह्यनादिमध्यं त्वनघं च देवम् ।
नमाम्यहं ते हरिमीशितारंलोकैकनाथंभवभीतिनाशनम् ॥२४
येनैकदंष्ट्रेण समुद्धृतेयं धराऽचला धारयतीह विश्वम् ।
इदं च हर्ता सकलंजगद्यस्तमीड्यमीशंप्रणतोऽस्मिविष्णुम् ॥२५
अंशावतीर्णेन च येन गर्भे हृतानि तेजांसि महासुराणाम् ।
नमामि तं देवमनन्तमीशमशेषसंसारतरोः कुठारम् ॥२६
देवो जगद्योनिरयं महात्मा स षोडशांशेन महासुरेन्द्र ।
सुरेन्द्रमातुर्जठरं प्रविष्टो हृतानि वस्तेन बलं वपूंषि ॥२७
तात कोऽयं हरिर्नाम यतो नो भयमागतम् ।
सन्ति मे शतशो दैत्या वासुदेवबलाधिकाः ॥२८

समस्त भूत जात जिससे प्रादुर्भूत होते हैं जिस प्रकार महासागर से निरन्तर तरंगें उत्पन्न होती रहा करती हैं। जब प्रलय का काल-आता है तो उसी प्रभु के रूप में सब लय हो जाया करते हैं उन्हीं अचिन्तनीय वासुदेव की सेवा में मैं प्रणत होता हूँ ॥२२॥ चक्षु रूप के ग्रहण में-यह त्वचा स्पर्श के ग्रहण में–रसके ग्रहण में रसना, गन्धग्रहण में घ्राण नियुक्त हैं किन्तु उसके ये त्वग्घ्राणचक्षु नहीं हैं ॥२३॥ वह सर्वेश्वर युक्ति से ही जानने के योग्य होता है। उस अनादि मध्य वाले, अनघ देव को मैं नमस्कार करता हूँ,जो पापों के हर्त्ता हरि-ईशिता-लोकों के एक नाथ और ससार के भय के नाश करने वाले हैं ॥२४॥ जिसने वराह अवतार धारण कर अपनी एक ही दाढ़ पर इस सम्पूर्ण भूमि को

